लघुआयुर्वेद विज्ञानम् (यकृदादि खञ्जनिकान्त रोग निदान चिकित्सा सहितम्)

— By पं॰ भगीरथस्वामी आयुर्वेदाचार्य.

Calcutta, n.d.

Bill No. 3/07-08

143.

2008-0308

13

1233

Indira Gandhi National Centre for the Arts

SANS
615.536
BHA

KALANIDHI
Rare Book Collection
ACC No.: R-308
IGNCA Date: 25.3.08

* श्री धन्वन्तरये नमः *

# लघु आयुर्वेद विज्ञानम्

DATA ENTERED
Date. 28/06/08

## यकृदादि खञ्जनिकान्तरोग निदान चिकित्सा सहितम्

बिहारायुर्वेद मध्यमाया द्वितीय खण्ड तृतीय खण्ड

परीक्षोपयोगिकम्

कलकत्ता श्री विशुद्धानन्द सरस्वती विद्यालयायुर्वेदाध्यापकेन

आयुर्वेद महामहोपाध्यायेन रसायन शास्त्रिणा

**भागीरथ स्वामिना आयुर्वेदाचार्य्येण**

छात्राणां हिताय आयुर्वेद विज्ञान पुस्तकेभ्यस्संग्रहीतम्

जवाहरप्रेस १६१/१, हरीसन रोड. कलकत्तामें मुद्रित

[redacted] डाकव्यय पृथक् ।

पुस्तक मिलनेका पता—

१४३, हरीसन रोड, कलकत्ता ।

अथवा

६४, लोअर चितपुर रोड, कलकत्ता ।

1233

किसी वैद्य या कविराजके यहां नहीं मिलनेवाला

# अष्टमांश या चतुर्थांश सुवर्णयुक्त मकरध्वज

अष्टमांश या चतुर्थांश सुवर्णयुक्त मकरध्वज हमारे यहां के सिवाय और कहीं भी नहीं मिल सकता। किसी मकरध्वजमें सुवर्ण नहीं चढ़ सकता। हमारे मकरध्वजकी परीक्षा करना हो तो मकरध्वजसे सुवर्ण भी निकल सकता है। इसकी परीक्षा अनेक विज्ञानवेत्ताओंने की है। जिनमें कलकत्ताके साइन्स कालिज और प्रेसीडेन्सी कालिज एवं बनारसका हिन्दू विश्वविद्यालयका नाम उल्लेख्य है। और कलकत्ते के प्रधान ७० वैद्योंके सामने भी मकरध्वजसे मकरध्वज बनाकर उस मकरध्वजसे सुवर्ण निकालकर भी दिखाया गया। इसी प्रकार मुम्बईके निखिल भारतवर्षीय वैद्य सम्मेलनमें भी बनाकर दिखाया गया है। इसके अविष्कारक बनारसके कविराज कृष्णपाल शास्त्री हैं।

१ तोला अष्टमांश सुवर्ण युक्त मकरध्वजका मूल्य ५०) और चतुर्थांश सुवर्ण युक्त मकरध्वजको ७०) रुपया है। इसके गुण की परीक्षा कीजिये।

पुस्तक मिलनेका पता—

आयुर्वेद महामहोपाध्याय रसायनशास्त्री

पण्डित भागीरथ स्वामी अयुर्वेदाचार्य्य

१४३, हरीसन रोड कलकत्ता।

अथवा—

६४, लोअर चितपुर रोड कलकत्ता।

* श्री धन्वन्तरयेनमः *

# आयुर्वेद—लघुविज्ञान—निदानम्

——:o:——

## यकृद्रोगाधिकारः

( लिवर Liver )

अधो दक्षिणतो ज्ञेया हृदयाद् यकृतः स्थितिः ।
व्याधयो बहवस्तत्र भवेयुर्भूरिदुःखदा ॥
म्लाने[१] तस्मिन् पुरीषस्याप्रवृत्तिः स्वल्पपित्तता ।
पाण्डुत्वं कर्दमाभत्व[२]श्चोदन्याविलमूत्रता ॥
उद्गारसदनाध्मानच्छर्दनोत्क्लेश[द]नान्य पि ।
प्रातस्तिक्तास्यता नाड्याः[३] काठिन्यं वह्निमन्दता ॥
देहस्य च मृदाभत्वं[४] रसना मल संयुता ।
लिङ्गान्येतानि जायन्ते तत्राप्याकुष्टिवद्[५] व्यथा ॥
गते यकृति संबृद्धिं वेदना तत्र जायते ।
उरोऽस्थिन दक्षिणे स्कन्धे सक्थिनि चाप्यपसव्यगे ॥
दक्षिणस्य भवेज्जाड्यं बाहोस्तिक्त[६]रसास्यता ।
विवर्णत्वं पुरीषस्य कामो लोहितमूत्रता ॥
अरतिर्बलहानिश्च ज्वरो बद्धाल्पविट्कता ।

---

१ अति षरिपक्व फलवत २ बसातुल्यं कोमलं ३ यकृन्नाड्याः काठिन्यम् ४ पीतमृदाभत्वं ५ संकोचवत ६ बाहो राकुञ्चन-प्रसारणादि क्रियायां विकृतिः ।

Centre for the Arts

पीताक्षस्त्वङ्ग पार्श्वेन शेते सव्येन चातुरः ॥
तोदभेदौ तथा दाहः१ कामलाप्यस्य जायते ।
निद्रानाशस्तृषा शोथस्तथा सत्वस्य संक्षयः ॥
विद्रधिर्यकृति स्याच्च प्रायेण प्राणनाशनः ।
तेन भाग्यबलात् कोऽपि जन्तुष्वेकः प्रमुच्यते ॥
मद्यातिपानादत्युष्णगुर्वन्नस्य निषेवणात् ।
वेगरोधाद्दिवास्वप्नान्निशि चापि प्रजागरात् ॥
अतिव्यवायभाराध्वसेवनादभिघाततः ।
तथान्यैः कर्म्मभिर्घोरैर्यकृद्रोगा भवन्ति हि ॥

## हृद्रोगाधिकारः

### ( हार्ट Heart )

Indira Gandhi National

#### हृद्रोगस्य विप्रकृष्टं निदानम्

अत्युष्ण गुर्वन्न कषाय तिक्त श्रमाभिघाताध्यशन२ प्रसंगैः ।
संचिन्तनैर्वेग विधारणैश्च जायेत रोगो हृदयेऽतिघोरः ॥

हृदये रोगो जायेत अतोऽयं हृद्रोगः स्यात्, सोऽतिघोरः कष्टप्रदो दुश्चिकित्स्यश्च ।

#### तस्य सम्प्राप्तिलक्षणम्

दूषयित्वा रसं दोषा विगुणा हृदयं गताः ।
हृदि वाधां प्रकुर्व्वन्ति हृद्रोगं तं प्रचक्षते ॥
वाधां दोषभेदेन नानाविधां व्यथाम् ।

---

१ यकृच्छिरादाहः २ भुक्तस्योपरिभोजनम् ।

### वातिकस्य हृद्रोगस्य लक्षणम्

आयम्यते१ मारुतजे हृदयं तुद्यते२ तथा ।
निर्म्मथ्यते३ दीर्यते४ च स्फोट्यते५ पाट्यतेऽपि६ च ॥

### पैत्तिकस्य तस्य लक्षणम्

तृष्णोष्मदाह चोषाः७ स्युः पैत्तिके हृदयक्लमः८ ।
धूमायनश्च मूर्च्छा च स्वेदः शोषो मुखस्य च ॥

### श्लैष्मिकस्य तस्य लक्षणम्

गौरवं कफसंस्रावोऽरुचिः स्तम्भोऽग्निमार्द्दवम् ।
माधुर्य्यमपि चास्यस्य वलासावतते हृदि ॥

### सान्निपातिकस्य लक्षणम्

विद्यात् त्रिदोषमप्येवं सर्व्वलिंगं हृदामयम् ।
क्रिमिजस्य हृद्रोगस्य विप्रकृष्टं निदानं सम्प्राप्तिश्च ।
त्रिदोषजे तु हृद्रोगे यो दुरात्मा निषेवते ।
तिलक्षीर गुड़ादींश्च ग्रन्थिस्तस्योपजायते ॥
मर्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति ।
संक्लेदात् क्रिमयश्चास्य भवन्त्युपहतात्मनः ॥

### तस्य लक्षणम्

उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लास६कस्तमः ।
अरुचिः श्यावनेत्रत्वं शोथश्च क्रिमिजे भवेत् ॥

---

१ आकृष्यत इव २ सूच्येव ३ निर्म्मथ्यतेदण्डेनेव ४ द्विधैव क्रियते ५ आरयैव ६ कुठारेणेव ७ चूषणवत्प्रपीड़ा चूष्यत इव ८ हृदयाकुलत्वं ग्लानिरितियावत् ६ हृदयकम्पनत्वम् ।

### हृद्रोगस्योपद्रवा

क्लमस्तन्द्रा भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः ।
क्रिमिजे तु क्रिमीणां ये श्लैष्मिकाणां हि ते मताः ॥
तन्त्रान्तरोक्तानां हृदयरोगाणां लक्षणादीनि ।

आवरणिकः [ पेरिकार्डाइटिस Pericarditis. ]

आमवाताद् वृक्कदोषात् शीतार्द्रत्वनिषेवणात् ।
हृत्कोठावरणी क्षिप्रं पीड्यते ह्यकृतात्मनः ॥
तत्र दाहोष्णता शोफो गौरवं महती व्यथा ।
कोष्ठ१संवेपनं कासो दौर्ब्बल्यं श्वासकृच्छ्रता ॥
नासामार्गेण रक्तस्य स्रुतिर्वन्हेश्च मन्दता ।
शाखासु शोफो धमनी भवेद् विषमगामिनी ॥
नाम्नावरणिको ह्येष व्याधिर्विद्वद्भिरुच्यते ।

कौष्ठिकः—हृद्वारप्रदाह [ इण्डोकार्डीटिस Endocarditis. ]

आमवाताच्चाभिघातात् तथावरणिकाद् गदात् ।
हृत्कोष्ठे जायते शोथो गद एष हि कौष्ठिकः ॥
ज्वरो दाहोऽरुचिः कम्पो वैवर्ण्यं बह्निसंक्षयः ।
श्वासः कासो राजयक्ष्मा कोष्ठे पूयस्य संचयः ॥
मूर्च्छालेपः प्रलापश्च नाड़ी विषमबाहिनी ।
गदाद् घोरतरादस्माद् भाग्यात् कोऽपि प्रमुच्यते ॥

---

१ हृदयादीनाङ्कम्पनम् ।

पृथुकः—हृत्पेशिबृद्धि [ हाइपरट्रौफी आफ दि हार्ट Hypertrophy of the Hert. ]

शोणितस्य गतौ कोष्ठे व्याहतायामनात्मनः ।
तत्पेशी पृथुतां याति मिथ्याहारविहारतः ॥
हृद्वेपथुर्व्यथा तत्र दौर्ब्बल्यं श्वासकृच्छ्रता ।
अरतिर्भ्रममोहौ च चिह्नानि पृथुके गदे ॥

आयामिका—हृदयबृद्धि [ डाइलेटेशन आफ दि लिवर Dilatation of the Heart ]

हृत्कोष्ठ प्रसृतिर्नाम्ना व्याधिरायामिका मता ।
श्वासः शोथो भ्रमो मूर्च्छा हृत्कम्पो बह्निमन्दता ॥
जलोदरमनिद्रत्वं बलमांसपरिक्षयः ।
एभिरन्यैश्च विज्ञेयश्चिन्हैरायामिको गदः ॥

परिक्षयः [ एआर्टिक ओबष्ट्राक्सन Aortic Obstruction ]

क्षयात् सञ्जायते घोरो व्याधिर्नाम्ना परिक्षयः ।
कोष्ठपेश्याः क्षयः श्वासो दौर्बल्यं सदनं भ्रमः ॥
हृद्वेपथुर्बह्निमान्द्यं क्रमाच्छोफश्च जायते ।
एतैरन्यैश्च विज्ञेयश्चिह्नैर्व्याधिः परिक्षयः ॥

मेदःसूत्रम्

हृत्कोष्ठ पेशीसूत्रेषु मेदःकणचयो गदः ।
मेदः सूत्राख्यया प्रोक्तो मुनिभिःस्तत्ववेदिभिः ॥
मन्दं मन्दं व्रजेन्नाड़ी भवेद्धृदयवेपथुः ।
अवसादो भ्रमोमूर्च्छा स्नायूनां बलसंक्षयः ॥

हृद्वृतेर्वापि सम्भेदान्मृत्युश्च सहसा भवेत्।
जातमात्रश्चिकित्स्योऽयं व्याधिः परमदारुणः॥

विक्षेपिका

हृत्कोष्ठाक्षेपको व्याधिर्नाम्ना विक्षेपिका मता।
जातेऽस्मिन् महति व्याधौ कोष्ठदेशेऽप्युरोऽस्थ्यधः॥
सव्यांसास्थ्नि सव्यबाहौ ग्रीवायां पृष्ठदेशतः।
वेदना जायते तीव्रा मर्म्मप्राणप्रपीडनी॥
तोदभेदौ समाकर्षौ दाहस्तत्र च जायते।
मुहुर्मुहुः श्वासरोधः शीता त्वक् स्वेदनिर्गमः॥
आध्मानोनाह मोहाश्च वैवर्ण्य कृशतारुचिः।
क्रमादिन्द्रिय विध्वंसो मरणं चाप्यनात्मनः॥

Indira Gandhi National Centre for the Arts

## उरस्तोयाधिकारः

उरस्तोयस्य सम्प्राप्तिः [ हाइड्रोथेरिक्स Hydrothorrax. ]
उरस्येकतरे पार्श्वे पार्श्वयोर्वाप्यपां चयः।
उरस्तोयगदो नाम प्रायशः प्राणनाशनः॥
उरसि वक्षोयन्त्रे। असौ गदः प्रायेण प्राणनाशनः।

उरस्तोयस्य लक्षणम्

कृच्छ्राच्छ्वासः कफस्रावो नीलावोष्ठौ तथा मुखम्।
शोथः पादे धरा क्षुद्रा विषमा वेगवाहिनी॥
मूत्रल्पत्वं भवेच्चापि स ना न शयनक्षमः।
स्वास्थ्यं किञ्चित् समासीनो लभतेऽस्मिन् महागदे।

धरा धमनी।

# औपसर्गिकोपदंशः

[ गरमी Syphilts ]

बहुसङ्करसेवाभ्यां सञ्जातो जननेन्द्रिये ।
व्रणः कष्टतरो घोरो नानारोगप्रकाशकः ॥
विषोपदंशः१ पापोपदंश इत्येवमीरितः ।
स एव हि बुधैः पूर्ब्बैः कथितश्चोपसर्गिकः ॥
व्याधिः संक्रामति स्त्रीतः पुंसि तस्यां ततस्तथा ।
अपत्येषु च जायेत कुलजोऽसौ मुदारुणः ॥
उपदंशो द्विधा प्रोक्तो मुख्यगौणप्रभेदतः ।
इन्द्रियस्यादिमो दोषो मुख्योऽन्यो दैहिकस्तथा ॥
आरभ्य च क्रियाकालं सप्ताहत्रयमध्यतः ।
व्रणो विषोपदंशस्य जायते जननेन्द्रिये ॥
भवेद् दीर्घतरं कालं यावन्तं समतीत्य यः ।
तथा कृच्छ्रतरः स स्याद् बहुदुःखप्रदायकः ॥
द्विधा पापोपदंशस्य व्रणः स्यात् कठिनो मृदुः ।
आद्यः२ संक्रामकः कृच्छ्रः सर्ब्बदेहप्रतापनः ॥
अपरो३ न च संक्रामेत् कश्चिद्देहं न दूषयेत् ।
एष साध्यतरः प्रोक्तो न च कष्टो यथादिमः ॥
पुंसो मेढ्रस्य मुण्डे च चर्म्मण्यावरके तथा ।
भगद्वारे भगौष्ठे च जायन्ते पिड़काः स्त्रियाः ॥

---

१ वैश्यापरयोषित्संसर्गज विषोपदंशः [ फिरङ्गः ]
२ प्रथमोमुख्यः ३ दहिकः ।

समन्तात् कठिनास्तास्तु विदीर्णा रसवाहिकाः ।
दृढमूला मध्यनिम्ना ज्वरब्रणादिदायिकाः ॥
मुख्योपदंश इत्यस्मिन् शान्तेऽपि पुनरेव हि ।
विकृतिं विविधां कुर्य्यात् तद्विषं देहसंस्थितम् ॥
त्वग्विकाराक्षिरोगौ च केशलोम्नाञ्च संक्षयः ।
ग्रन्थिपीनसकुष्ठानि गौणोपदंशलक्षणम् ॥
त्वग्विकारादयो गौणोपदंशत्वेन लक्ष्यन्ते ।
विषं पापोपदंशस्य श्लेष्मग्रन्थिषु सन्स्तृतम् ।
व्रध्नरोगं सञ्जनयेत् सज्वरं बहुदुःखदम् ॥

## आगन्तुज पक्षाघाताधिकारः

[ लेड्पालसी Leadpalsy ]

पक्षाघातो द्विधा ज्ञेयो दोषागन्तुजभेदतः ।
दोषजः कथितः पूर्ब्बमधुनागन्तुजं श्रृणु ॥
आगन्तुजोऽपि द्विविधः पक्षाघातः प्रकीर्त्यते ।
आद्यः पारदसम्भूतो१ द्वितीयो नागजः२ स्मृतः ॥
नागजः सीसकजः ।

तत्र पारदज पक्षाघातस्य निदानम्

रससंस्पर्शसातत्यात् तद्धूमस्य च सेवनात् ।
पक्षाघातो भवेद् यस्तु स ज्ञेयः पारदोद्भवः ॥

---

१ पारद चूर्ण [ भस्म ] अशुद्धापरिक्षिताम पारद विकृतिः ।
२ सीसकज कंकुष्ठं [ मुर्दारसंग ] कीसका भस्मादि विकृतिजः ।

तस्य लक्षणम्

आदौ वाह्वोर्बलध्वंसस्ततः कम्पः प्रजायते ।
वेपते वाक्सथिनी१ चापिकायः सर्व्वस्ततः परम् ॥
गदी चलति नृत्यन् वै दृढं द्रव्यं न धारयेत् ।
स्पष्टं प्रभाषितुञ्चापि चर्व्वितुञ्च न च क्षमः ॥
ततस्तस्यातिनिद्रा च प्रलापो बलसंक्षयः ।
हृल्लासो बह्निनाशश्च दन्तध्वंसः कचित् स्रुतिः ॥
शान्तिर्भवति कम्पस्य विधृतेऽङ्गे२ रसामये ।
नागामयस्य लिङ्गानि शृणुतात समासतः ॥
अत्र णै शब्दस्य इवार्थे प्रयोगः । स्रुतिर्लालास्रावः ।

नागज पक्षाघातस्य निदानम्

चित्रकृत्प्रमुखा३ ये हि नागैः४ कर्म्म५ प्रकुर्व्वते ।
ये वा व्यवहरन्त्यस्य पात्रं तेषां ततो गदः ॥

अस्य लक्षणम्

अङ्गुलीस्तु समारभ्य मणिबन्धं ततोऽखिलम् ।
व्याधिर्व्याप्नोति दौर्ब्बल्यं तत्रैकं लक्षणं महत् ॥
अंशे प्रकोष्ठे तोदश्च६ वाह्वोश्च परिशीर्णता७ ।
नीलिमा दन्तवेष्टे च शूलं चिह्नानि चास्य वै ॥

---

१ पादसक्थिनः साथल इति भाषा २ उपवेशन शयनादि समये ३ चित्रकाराः ४ नागजातैर्विकारै स्सफेदाकाशगरी प्रभृतिभिः ५ चित्रादि कर्म ६ व्यथा ७ जर्जरत्वं ( कार्य्य करणा सामर्थ्यम् )

# गदोद्वेगाधिकारः

[ डिलेरियम ट्रीमेन्स Delirium Tremens ] ब्लडप्रेसर

गतेरक्तस्य मन्दत्वात्तिक्ष्णत्वान्मस्तकेऽथवा ।
गदोद्वेगः प्रभवति नानातङ्ककरस्सदा ॥
बिना व्याधिं व्याधिशंका गदोद्वेग इतीरितः ।
पदार्थत्वा१भाववत्वादपदार्थगदश्च सः ॥

अपदार्थगदस्य निदानम्

कायेन मनसा भूयान् श्रमः शोको बलक्षयः ।
नैराश्यं मानहानिश्च गदोद्वेगो महाभयम् ॥
दुरदृष्टं वीजदोषः सत्वास्याभाव२ एव च ।
अपदार्थगदस्यैते हेतवः कथिता बुधैः ॥

Indira Gandhi National
Centre for the Arts

तस्य लक्षणम्

अद्भुतस्य गदस्यास्य लक्षणान्यद्भुतानि च ॥
कोऽप्येवं मन्यते नूनमुदरं भुजगो३ऽविशत् ।
कोष्ठे भ्रमत्यसौ नित्यं भुङ्क्ते यद्भुज्यते मया ॥
निर्यास्यति पथा केन केनोपायेन नंक्ष्यति ।
किं विधास्यति ना जाने दश्ये वाहं दुरात्मना ।
कोऽपि वा मनुते भेको४ ममैको मूर्द्ध्नि संस्थितः ॥
विघट्टयति मस्तिष्कं मारयिष्यति मां ध्रुवम् ।
कोऽपीत्थं चिन्तयेच्चित्रं कायः काचमयो मम ।
संजातोऽयमतो रक्ष्यः सदाघातात् प्रयत्नतः ॥

---

१ ओजोऽभावः २ बलाभावः ३ सर्पः ४ मंडूकः ।

इत्येवं बहुरूपाभिर्व्यर्थचिन्ताभिराकुलः ।
अपदार्थगदी शुष्येत् सदा भीतः सदासुखी ॥
बहुधा बोधितोऽप्येष सान्त्वितोऽपि पुनः पुनः ।
चित्ताद् भ्रमं निराकर्त्तुं न शक्नोति न साध्वसम् ॥
यश्चास्य कथयेद्भ्रान्ति तस्मै द्रुह्यात्स नित्यशः ।
प्रीयते च गदोद्वेगी व्याधेः सत्त्वत्ववादिनि ॥
गदोद्वेगवता कोष्ठे कस्मिंश्चिदनुभूयते ।
सुतीव्रा वेदना प्रायः पाककोष्ठे विशेषतः ॥
जिह्वास्यात् कफलिप्तास्य पूतिः श्वासौ निरेति च ।
उत्क्लेशश्च तथा वान्तिरित्थञ्च जीर्णलक्षणम् ॥
प्राखर्य्यं स्पर्शशक्तेश्च पाण्डुत्वमुदरामयः ॥

पाककोष्ठे आमाशये पक्वाशये [ मेदा ]

हृदि सांघातिको व्याधिः केन वाप्यनुभूयते ।
गदोद्वेगवतान्येन पुरुषत्वस्य संक्षयः ॥
ज्वरः सततकोऽन्येन दुष्प्रतीकार्य्य एव च ।
किमाश्चर्य्यं वेपनाद्य[१] जायते च तदा तदा ॥
इत्थं बहुविधाकारा व्याधयः कल्पनाकृताः ।
भ्रमरूपाः प्रजायन्ते निसत्त्वानाममेधसाम् ॥
शक्यन्ते व्याधो वक्तुं नैते निरवशेषतः ।
बुद्धिमद्भिर्लक्षणीया यथास्वं दोषलक्ष्म च ।
प्रायसः षोड़शादर्व्वाङ्[२] नच पञ्चाशतः[३] परम् ॥

---

१ कम्पनादिकं २ षोड़शवर्षात् पूर्वं ३ पञ्चाशद्वर्षात्परं ।

व्याधिरेष प्रदृश्येत हेतुस्तत्र मनोगतिः ।
मासि मासि रजःस्रावात् सर्व्वे शुध्यन्ति धावतः ।
अतः स्नायुगदः स्त्रीणामेष प्रायो न जायते ॥

## शैशवसन्न्यासस्य निदानं लक्षणञ्च

[ एपीलेपसी Epilepsy ]

दुष्टस्तन्यस्य पानाच्च सदा शीतगृहे स्थितेः ।
वातातपविहीने वा दुष्टानिलविदूषिते ॥
पानाशनविहारैश्च दोषलैर्बहुभि श्शिशुः ।
सन्न्यासाख्येन रोगेण पीड्यते क्रिमिभिस्तथा ॥
उत्तारनयनः स स्यादाक्षिप्ताङ्गस्त्वसंज्ञकः ।
दारुवत्पतितो भूमौ दृढकायो मृतोपमः ॥
नाम्ना शैशवसन्न्यासो गदोऽयं शिशुपीड़नः ।
क्रिया सद्यःफला चात्र रेचनञ्च हितं मतम् ॥

पाश्चात्यनां मते अपस्मार सन्यासयो र्नास्ति प्रायोभेदो वार्णितस्तस्मादेकमेवनाम ।

## योषापस्मारस्य

[ हिष्टेरिया Hysteria ]

कैश्चित् योषापस्मार इति पृथक् प्रोक्तं निदानम महत्वकरमपस्मारस्यप्रधान लक्षणानां मुखफेनोद्गमादीनामभावात् । फेनसत्वे ह्यपस्मारे गणनाशङ्क्या तथा प्राश्चात्यनूतन मतानुसारेणोक्तानि हिष्टेरियेत्यस्य योषापस्मारस्य लिगानि वातजेषु ह्यपतन्त्रकादिषु सन्त्येव । ततस्त्यक्तव्यानि हिष्टेरिया अपतन्त्रकोव्याधि नूतन इति । नूतनत्वं मन्द वैद्यानां कल्पनेति स्वामिनाम्मतम् ।

शोणितस्य क्षयाद्वापि तथाधिक्यादजीर्णतः ।
कोष्ठरोगान्मनोभङ्गादत्युद्वेगाच्च शोकतः ॥
रजोऽभावाच्च योषाणां जरायुविकृतेस्तथा ।
अशक्तेरपि नैष्ठुर्य्यात् पत्युरस्नेहतस्तथा ॥
वैधव्यजन्यादाधेश्च योषापस्मार संज्ञकः ।
गदः सञ्जायते कृच्छ्रो मनोदेहप्रतापनः ॥
योषितामेष बाहुल्याद्यत एष भवेद् गदः ।
अपस्मारप्रकृतिकस्तेनास्यैषाभिधा मता ॥
फेनभावादृते सर्वाणि लिंगानि ज्ञेयानि अपस्मार प्रकृतिकः
पाठस्तु ममते चिन्त्यः अपस्मार प्रधान फेनोद्गमाभावात् ।
कालोऽस्य यौवनं व्याधेर्नार्वाग् द्वादशवर्षतः ।
परं पञ्चाशतो वापि व्याधिरेषः प्रजायते ॥

Indira Gandhi National

अस्य पूर्वस्वरूपम्

हृद्रुजा जृम्भणं सादो वर्ष्मणो[1] मनसोऽपि च ।
भवेद्भविष्यति गते योषापस्मारसंज्ञके ॥

अस्य लक्षणम्

वैचित्र्यं बुद्धिविभ्रान्तिर्हास्यं क्रन्दनमेव च ।
उच्चैः क्रोशः प्रलपनं ज्योतिर्द्वेषस्तथा भ्रमः ॥
औद्धत्यं श्वासकृच्छ्रञ्च कण्ठामाशयवेदना ।
प्राबल्यं स्पर्शशक्तेश्च क्वचिदंगे सदा व्यथा ॥
अलीकवत्तुलोत्थानमाकण्ठमुदरादपि ।
सदल्प बुद्धिमूर्च्छा च व्याधावस्मिन् प्रजायते ॥

---

१ शरीरस्य ।

# तत्त्वोन्माद

## तत्त्वोन्मादस्य स्वरूपम्

अहो मम महद्भाग्यं लब्धा यद् ब्रह्मणः कृपा ।
इत्येवं भ्रमजो मोहस्तत्त्वोन्माद इतीरितः ॥
तत्त्वन्मादो हर्षमौढ्यं ब्रह्ममोहश्च स स्मृतः ।
वृथाधीप्रभवो व्याधिरयं सद्भिर्निरूपित ॥
किंरूपं कुत्र वा ब्रह्म नैतज्जानाति कोऽप्यहो ।
पुराणैर्दर्शनैर्वा न लब्धं यद् ब्रह्मदर्शनम् ॥
एकेशकर्त्तृकं विश्वं वदन्त्यन्ये निरीश्वरम् ।
ब्रह्माण्डं ब्रह्मतर्केण व्याकुलं बहुधा वृथा ॥
मानं दुरूहं सत्तायामास्तां दूरे दयादिकम् ।
अनिर्णीतमनिर्णेयं तदेवमवधारय ॥
मदर्थं ब्रह्म कुर्व्वेतज्जह्येनं मम वैरिणम् ।
धनं देहि यशो देहि देहि राज्यमकण्टकम् ॥
विशालनेत्रां सुदतीं पीनोन्नतपयोधराम् ।
नितम्बिनीं क्षीणमध्यां स्मरकेलिकलाविदाम् ॥
नित्यं नर्मप्रियां तन्वीं रम्भोरुं रसिकेश्वरीम् ।
मद्व्रतां नित्यसन्तुष्टां सुन्दरीं देहि कामिनीम् ॥
इत्थमर्थनमात्रेण ब्रह्म भीतं ससम्भवम् ।
भ्रान्तबुद्धे न मन्यस्व प्रार्थितं साधयिष्यति ॥
कदाचित् प्रार्थना कापि यदि ते सफला भवेत् ।
विद्धि तत् काकतालीयं तत्र ब्रह्म न कारणम् ॥

न स्तवैर्हृष्यति ब्रह्म नापि द्वेष्टि च निन्दया ।
अस्तिवादी प्रियोनास्य नास्तिवादी न चाप्रियः ॥
न मुर्खेऽनादरस्तस्य बहुमानो न पण्डिते ।
धनिनो वा भयं नास्य न दरिद्रे च ताड़नम् ॥
श्वपाके यवने वापि ब्रह्मणे वेदपारगे ।
मद्यपे गणिकासक्ते मालातिलकधारिणि ॥
शुचौ वाप्यशुचौ साध्व्यां वेश्यायां बालवृंद्धयोः ।
सर्व्वत्रैव समं ब्रह्म विश्वरूपं सनातनम् ॥
एवंभूतस्य तस्येयमिति मत्प्रीतये कृतिः ।
तत्त्वोन्माद्यति यस्तस्य व्याधिरुन्माद एव हि ॥
( तत्त्वोन्माद इत्यत्र उन्मादशब्दो भावकृता निष्पन्नः )
प्रायशो बुद्धिहीनानामसतां नीच चेतसाम् ।
व्याधिरेषोऽभिजायेत कदाचिन्महतामपि ॥

### तत्त्वोन्मादस्य निदानम्

अतिप्रगाढ़ाच्चित्तस्य धर्म्माद्यभिनिवेशनात् ॥
तत्त्वोन्माद इतिख्यातो जायते वातकोपतः ॥

### तस्य लक्षणम्

ब्रह्ममोहे प्रमूढ़त्वं स्थिरास्पन्दा कनीनिका ।
चक्षुरुन्मीलितं सुप्तिर्गतिरोधोऽथ वाग्मिता ॥
दम्भोग्रभावी विक्षेपो हास्यं क्षैव्यञ्च रोदनम् ।
एवम्भूतानि लिंगानि तत्त्वोन्मादे भवन्ति हि ॥

# स्नायुशूलम्

[ न्यूरेल्जिया Neuralgia ]

## स्नायुशूल स्वरूपम् [ नाड़ी-पीड़ा ]

स्नायुष्वतीव या घोरा तच्छाखास्वपि वा पुनः ।
वेदना स्नायुशूलाख्या सा भवेत प्राणपीड़नी ॥

## व्याधेः स्थानम्

बाह्वोः शीर्षस्तथा सक्थ्नोरन्यस्याङ्गस्य वा पुनः ।
त्वचो निम्नस्थितास्वेव वस्नसासु गदो भवेत् ॥

वस्नसासु स्नायुषु ।

शूलोऽयं निखिलांगेषु भवेत् तीव्ररुजाकरः ।
विशिष्टांगभवस्यास्य विशिष्टाख्या च वर्त्तते ॥
ऊर्द्ध्वभेदार्द्धभेदौ चाप्यधोभेदस्तथैव च ।
मुण्डमुण्डार्द्धकस्फिग्जगदानामभिधाः क्रमात् ॥

## तत्रोर्द्ध्वभेदस्य निदानम्

बलरक्तक्षयाद्वापि वृक्कमस्तिष्कदोषतः ।
अजीर्णाद् दशनव्याधेरूर्द्ध्वभेदो गदो भवेत् ॥
ललाटेऽक्षिपुटे निम्ने गण्डे नस्योष्ठ एव च ।
जिह्वापार्श्वेऽधरे दन्ते शूलवद् दाहवच्च या ॥
एकस्मिन् प्रायशः पार्श्वे वेदना मुखमण्डले ।
ऊर्द्ध्वभेदाख्यया सोक्तागदङ्कारैः क्रमैधिनी ॥

क्रमैधिनी क्रमशो बर्द्धिता ।

अस्यानुपशयः

शीतानिलस्य संस्पर्शाद् देहकम्पाच्च बर्द्धते ।
स्नायुमेदस्य विकृतेरङ्गभेदे भवेद् गदः ॥

अर्द्धभेदस्य निदानम् [ हेमक्रेनिया Hemicrania ]

आर्द्रस्थानस्थितेश्चापि शीतयोगाद् बलक्षयात् ।
अर्द्धभेदः प्रजायेत दुष्टवाताम्बुसेवनात् ॥

तस्य लक्षणम्

यार्द्धं व्याप्य भवेत् तीव्रा वेदना मुखमण्डले ।
वामे च प्रायशः पार्श्वे सार्द्धभेदः प्रकीर्त्त्यते ॥
वाणेनेव शिरोविद्धं व्यथतेऽति सुदारुणम् ।
कदाचित् क्रममालम्ब्य विरामश्चात्र वा महान् ॥
बाहुल्येन च नारीणां व्याधिरेष प्रजायते ।
प्रादुर्भावो वयस्थस्य यौवने ह्यधिको मतः ॥

अधोभेदस्य निदानम्

विड्विरोधाच्क्रमाच्छीताद् दौर्बल्यादामवाततः ।
आर्द्रस्थानस्थितेर्गर्भदोषात् स्यान्निम्नभेदकः ॥

निम्नभेदकः अधोभेदः ।

तस्य लक्षणम्

स्फिच्यूरुजानुसन्ध्योश्च पश्चिमे च क्वचित् पदे ।
जङ्घायां वापि यच्छूलमधोभेदस्स उच्यते ॥
एकस्मिन् प्रायशः सकथिन शूलोऽयं स्यान्निशावली ।
बाहुल्येनैव वयसि प्रौढ एव प्रजायते ॥

# ताण्डवरोगाधिकारः

[ इन्‌फैन्टाइल कनवलशंस Infantiel Convulsions ]

हिमवच्छिखरे रम्ये सिद्धर्षिगणसेविते ।
सुगन्धिसुमनः शोभिफलवद्बहुपादपे ॥
श्रुतद्विजकुले शान्तैः श्वापद१दैर्बहुभिर्वृते ।
वटमूले समासीनमात्रेयं ज्ञानसागरम् ॥
आयुर्व्वेदमहाचार्य्यं तपोदीप्तकलेवरम् ।
उरभ्रो भक्तिमानग्रे कृताञ्जलिरभाषत ॥
कथं ताण्डवरोगस्य जन्म चिह्नानि कानि च ।
कथञ्च स्यात् प्रतीकारः सर्व्वं मे कृपया वद ॥
श्रुत्वैतां प्रार्थनां धीरः शिष्याय शिष्यवत्सलः ।
वचनैर्वक्तुमारेभे व्यक्तार्थैस्तदृषीश्वरः ॥

Centre for the Arts

## ताण्डवरोगस्य निदानम्

आत्रेय उवाच—

प्रीतोऽस्मि भक्तिमन् वत्स ब्रुवे यच्छ्रोतुमिच्छसि ।
यद् दक्षायावदत् पूर्व्वं ब्रह्मा लोकपितामहः ॥
अत्यातङ्कादतिक्रोधादतिहर्षाद्बलक्षयात् ।
कर्षणात् स्वप्नरोधाच्च विड्बन्धात् क्रिमिसञ्चयात् ॥
आशानाशाच्चभिघातात् स्त्रीणामृतुर२विपर्य्ययात् ।
कशेरुकामज्जनश्चात्युग्रभावात् प्रजायते ॥

---

१ सिंहादिभिः २ समये ऋत्वभावः असमये ऋतुस्रावः ।

व्याधिस्ताण्डवनामा स प्रणिनां क्लेशकृत् परः ।
अङ्गानां ताण्डवादस्य ताण्डवाख्या बुधैः कृता ॥
कैशोरे वयसि प्रायः स्त्रीणाञ्चापि विशेषतः ।
व्याधिरेषोऽभिजायेत बृद्धानाञ्च वलक्षयात् ॥

ताण्डवरोगस्य लक्षणम्

वामबाहुं समारभ्य प्राय आदौ ततोऽपरम् ।
ततः पादौ ततोऽङ्गानि चालयेत् ताण्डवामयः ॥
मुष्टिना किमपि द्रव्यं सम्यग्धारयितुं क्षमः ।
समर्पयितुमास्ये वाप्यदनीयं न ताण्डवी ॥
नृत्यन्निव चलत्येप वीभत्सैर्मुखचेष्टितैः । [ वीभत्सैर्मुखचेष्टितैरुपलक्षितैः ]
अधीरः सततं तिष्ठेन्निद्रायां कम्पवर्ज्जितः ॥

Indira Gandhi National Centre for the Arts

## क्लोमरोगः

प्लीहाक्षुद्रान्त्रयोर्मध्यमन्नपाकादिकर्म्मणि ।
सहायभूतमध्यास्ते क्लोम तच्च तिलाभिधम्१ ॥
गुर्व्वतिस्निग्ध भोज्यैश्चाप्यभिघातादिभिस्तथा ।
वृद्धिस्तस्य तृदुत्वञ्च तत्र शोणितसञ्चयः ॥
विद्रधिर्वा भवेत्तत्र व्याधयोऽन्ये च दारुणाः ।
एवं विकृतिमापन्ने तिलके बह्निसंक्षयः ॥
उत्क्लेशो बमनं कार्श्यं पाण्डुता सदनं भ्रमः ।
ऊर्द्ध्वोदरे तथा तीव्रा काठिन्यमपि चोष्णता ॥

---

१ तिलनामकम् ।

शूलाध्मान प्रसेकाश्च विद्रधौ महती च तृट् ।
शिला चाप्यश्मरीतुल्या सुकष्टाप्यत्र जायते ॥

## वृक्कामयाधिकारः

वृक्करोग वृक्कप्रदाह [ बृघथ डिशेज Brighth Disease ]

### वृक्कामयस्य पूर्वरूपम्

त्वग्रुक्षोष्णा वेगवती धमनी कठिना तथा ।
निद्रानाशो बह्निमान्द्यं शोथोऽक्षिण च मुखे पदे ॥
वृक्कामयस्य पूर्व्वाणि रूपाण्याहुर्भिषग्वराः ।

### वृक्कामयस्य लक्षणम्

रक्तालपत्वान्मुखस्य स्यात् पाण्डुत्वं कटिवेदना ।
त्वक् शुष्का स्वेदहीना च धमनी द्रुतगामिनी ॥
बह्निमान्द्यमजीर्णञ्च भक्तद्वेषो व्यथोदरे ।
अम्लोद्गारस्तथा च्छर्दिर्हृद्‌द्वेपः श्वासकृच्छ्रता ॥
मूत्रालपत्वं सदा वेगो विशेषान्निशि जायते ।
मूत्रकाले च शिश्नाग्रे मनाग्दाहोऽनुभूतये ॥
वृक्कयोर्विकृतिश्चास्मिन् विशेषाज्जायते गदे ।
यकृत्प्लीहहृदाञ्चापि सा सदैव प्रजायते ॥
कर्णनादो दृष्टिदोषः शिरोग्रीवांसवेदना ।
शाखासु गौरवं मूर्च्छा वृक्करोगस्य लक्षणम् ॥

### वृक्कामयस्य निदानम्

रक्तस्य परिवृत्त्या हि जायते वृक्कवैकृतम् ॥

# ओजोमेहाधिकारः

[ एल्ब्यूमिनेरिया Albuminuria ]

अभिघाताग्निमान्द्यामवाताजीर्णविसूचिका ।
विषमज्वरशोथाद्यैर्यक्ष्मकासाभिस्तथा ॥
वृक्कयोः शोणितस्रोतोविवृतेरस्रदोषतः ।
लसिकाशुक्र पूयास्रैर्युक्ते मूत्रे तथा नृणाम् ॥
स्त्रीणां गर्भागमे चैव कटुकक्षारवर्ज्जितैः ।
यधुरौ जस्करद्रव्यभक्षणै रतिमात्रतः ॥
गुरुपर्युषितानाञ्च भोजनादतिभोजनात् ।
नवधान्यादिगोधूम हंसडिम्बातिसेवनात् ॥
दूषिते शीतले तोये स्नानपानावगाहनात् ।
एभिर्निदानैरन्यैश्च दूषितादोजसो भवेत् ॥
ओजोमेहः स विज्ञेय आयुर्ब्बलनिकृन्तनः ।
शारीरिकश्रमवशात् तथान्येनैव हेतुना ॥
द्रुतं शोणितसञ्चारात् प्रकृतेश्च विपर्य्ययात् ।
ओजोविकृतिमापन्नं हंसाण्डश्वेतभागवत् ॥
पिष्टतण्डुलवद्वाथ सह मूत्रेण संस्रवेत् ।
मेदःक्षयो भवेत्तत्र ज्वरारोचकयोस्तथा ॥
शोथेऽग्निमान्द्ये सञ्जाते गदोऽसाध्यो न संशयः ।
अन्यथा कृच्छ्रसाध्योऽसौ यत्नात् जीवति मानवः ॥

# औपसर्गिकमेहः ( सूजाक )

[ गनोरिया Gonorrheea ]

बहुसङ्कर सम्भोग प्रक्लिन्नेन्द्रियया पुमान् ।
स्त्रिया सङ्गम्य संमूढ़ो गदमाप्नोति दारुणम् ॥
मूत्रनाड्यन्तरस्थाना त्वगस्य श्लेष्मवाहिणी ।
व्रणितावाहरेत् क्लेदं व्रणमेहः स उच्यते ॥
औपसर्गिक मेहश्च तस्य नामान्तरं मतम् ।
क्रिमिमेहः पूयमेहो गौणमेहः प्रमादजः ॥
विषमेहाऽन्यजश्च गणिका संगदोषजः ।
मेह आगन्तुकश्चापि स कैश्चित् परिभाष्यते ॥
आरभ्य सङ्गमनिशां संख्यया या च सप्तमी ।
एतद्व्यहिते काले प्रायशो जायते गदः ॥
कण्डूः शिश्नाग्रतस्तस्य समुत्थानं मुहुर्मुहुः ।
तीव्रवेदनया चापि मुहुर्मूत्र प्रवर्त्तनम् ॥
स्फीतिर्लिंगस्य लौहित्यं कोषे व्रध्ने च वेदना ।
कदाचित् क्लेदसंरुद्धमार्गत्वादतिरुक्स्रवेत् ॥
मूत्रं दाहेन घोरेण द्विधारं वा प्रवर्त्तते ।
क्षरेद्वा क्षतजं मेढ्रान्मूत्रकाले कदाचन ॥
सन्ततं तनुरास्रावः स्रवेदादौ ततोऽतनुः ।
स तावत् पुनराशुष्यन् पीतिमानं प्रयाति च ।
कालो लब्ध्वीं व्यथां कुर्य्याद्व्याधिश्च दुष्प्रतिक्रियम्
आमवाताक्षिरोगाद्या ज्ञेयाश्चास्य ह्युपद्रवाः ॥

# शीर्षाम्बुरोगः

[ क्षयज-मेनिनजाइटिस Meningitis ] पक्षाघातः

## तस्य निदाननं सम्प्राप्तिश्च

अत्र क्षयज शिरोगत वसाकलोत्पन्न लक्षणः पक्षाघातस्य ।
नास्ति शीर्षाम्बुः स्वतन्त्रोव्याधिः किन्त्वस्य पारतन्त्रत्वम् ।
मद्यातिपानादतिशैत्ययोगाद् विरुद्धभोज्यादनिलप्रदोषात् ।
दुष्टाम्बुपानादभिघाततश्च तथान्त्रमध्ये क्रिमिसम्भवाच्च ॥
शिरोगतस्नेहबृतौ क्रमेण सञ्चीयते तोयमतिप्रभूतम् ।
शीर्षाम्बुनामा गद एष पूर्व्वैः प्रकीर्तितः कृच्छतरो भिषग्भिः ।
प्रायशः शैशवे व्याधिर्विविधाहितसेवनात् ।
तथा दन्तोद्गतेरेष बाहुल्येनाभिजायते ।

## अस्य पूर्व्वरूपम्

जिह्वा लिप्तातिनिद्रत्वं दौर्ब्बल्यं श्वासपूतिता ।
गाढ़विट्ता च तस्मिंस्तु भविष्यति भविष्यति ॥

## तस्य लक्षणम्

शिरसो वेदना घोरा श्रुतेर्दृष्ठेश्च तीक्ष्णता ।
मूत्राल्पत्वं कृष्णविट्त्वं धमनी वेगवाहिनी ॥
त्वग्रुक्षोष्णा तथा छर्दिर्विषमा च कनीनिका ।
कोपित्वं मुखवैवर्ण्यं निद्रायां दन्तघर्षणम् ॥
कण्डूरौष्ठस्य नासायो आक्षेपो रक्तनेत्रता ।
पक्षाघातः प्रलापश्च शीर्षाम्बुगदलक्षणम् ॥

## मस्तिष्कवेपनाधिकारः

[ इन्फैन्टाइल हैमीप्लोजिया Infantile Hemiplegia ]

पाश्चात्य वैद्यैर्बालपक्षाघात नाम्नाप्रोक्तः । तस्मिन् शीर्षाम्बुत्वं मेकंलिंगम् । नहि स्वतन्त्ररोगः ।

मस्तिष्कवेपनस्य निदानं लक्षणञ्च

शिरस्यभिहते तैस्तैर्मूर्च्छाहृल्लासवान्तयः ।
जड़त्वं स्पन्दनह्रासो दौर्व्वल्यं चलचित्तता ॥
वेपथुः कर्णनादश्च मलिनत्वं मुखस्य च ।
पृथुत्वं तारकायाश्च धमनी बलवर्ज्जिता ॥
शीतलत्वं शरीरस्य वैकृत्यं वचनस्य च ।
तथा पक्षवधं स्याच्च गदोऽसी शीर्षवेपनः ॥

Indira Gandhi National
Centre for the Arts

## मस्तिष्कचयापचयाधिकारः

[ सेरिबिरल अबसिस Cerebral Abseess ]

अत्र व्रणयोगा च्छोथबर्द्धनाच्चयः । अर्द्धाङ्ग पक्षाघाता-दपचयः । शिरोऽपचयः शिरसोऽपचयः । इमौ द्वौ भिन्नौ बालानां प्रयोभवतियूनामपि । अपचयः ( क्षयः ) अल्पत्वात् ।

देहस्वभावाद् दिष्ट्या१ च बर्द्धते मस्तुलुङ्गकः२ ।
करोटिरपि३ बालानां यूनाञ्चापि कदाचन ॥
मस्तिष्कस्य करोटेश्च यदि बृद्धिर्द्वयोर्भवेत ।
न चिन्हं दृश्यते किञ्चित प्रायसः समबर्द्धनात् ॥

---

१ परिमाणेन २ मस्तिष्क ३ शिरोऽस्थिनः ।

IGNCA RAR
ACC No. R-308
SANS
615·536
BHA

मस्तिष्कस्यैव चेद्वृद्धिर्न करोटेस्तथा भवेत्।
तदा निपीड़नात् तस्य जायन्ते विविधा रुजः ॥
सिरसोऽतिरुजा तीव्रा दौर्ब्बल्यं भ्रममूर्च्छने ॥
पक्षाघातस्तथाक्षेपः स्ततो मरणमेव च।
ह्रासमायाति मस्तिष्कं देहदोषाददृष्टतः ॥
एकपार्श्वे ह्रसेत् तच्चेन्न शीघ्रं जीवनक्षयः।
समन्ताद्ध्रसनात् तस्य प्राणान्तस्त्वरया भवेत् ॥

## अंशुघातः

[ सनस्ट्रोक Sunstroke ]

### अंशुघातस्य निदानं लक्षणञ्च

चण्डांशोरंशुना शीर्षिणं तप्ते चण्डेन जायते।
अंशुघाताभिधो व्याधिः प्राणिनां प्राणपीड़नः ॥
तृष्णातिघोरा त्वग्रुक्षा भ्रमोनेत्रस्य रक्तता।
मूत्रवेगश्च मूर्च्छायो ह्रल्लासो विषमाधरा ॥
श्वासकृच्छ्रं स्पर्शहानिराक्षेपश्चात्र सम्भवेत्।
प्रायः कारावरुद्धानां भटानां जायते च सः ॥
अतो यत्नेनतेयान्ति सायंकालेऽस्तगेरवौ।
उष्णदेशे ग्रीष्मकाले सूर्य्यतापान्वितो ध्रुवम् ॥
वायुर्बहति तेनैव घर्मदाहोऽय मुच्यते।
मार्गे इतिशेषः हिन्दीभाषायां लू० इति।

तेनोष्ण वायुनादग्धा पतन्तिभुवि दारुवत् ।
आधिक्येन यदा दग्धा यान्तितेयम मन्दिरम् ॥
वार्षिकोयं महाव्याधिर्जानन्ति भुवि मानवा ।

स अंशुघातः सर्द्दीगर्मीति बंगभाषा ।

अस्यारिष्टं लक्षणम्

नीलिमा हस्तपादस्य धमन्याः क्षणलुप्तता ।
विक्षेपणंच गात्राणां मरणायांशुघातिनः ॥

अंशुघातिनः सूर्य्यज तप्ततीव्रांशुयुक्तवातघातिरोगिणः ।

## योनिकंडु

### निदानम्

Indira Gandhi National
Centre for the Arts

योनी बलासे संक्रुद्धे जरायुविकृतेस्तथा ।
वस्तिद्वारेऽब्र्बुदे जाते दुर्नामगदतोऽपि च ॥
योनेः शिराणां प्रसृतेर्वातवत्याश्च योषितः ।
रजः प्रवृत्तिसमये पुरुषेणातिसंगमात् ॥
गर्भप्रागुद्भवे चापि योनिकण्डूः प्रजायते ।
वार्द्धक्य एव नारीणां सा बाहुल्येन सम्भवेत् ॥

तस्या लक्षणम्

योनी कण्डूश्च तोदश्च रौक्ष्यं शुष्कत्वमेव च ।
योनिकण्डूगदस्यैतल्लक्षणं भिषजो विदुः ॥
उष्णानुपशयो व्याधिः शीतोपशय एव हि ॥

## बाधकः

### तन्त्रविशेषोक्तस्य बाधकस्य लक्षणम्

रक्तमाद्री तथा षष्ठ्यङ्कुरी जलकुमारकः ।
बाधका इति चत्वारः प्रजाजननबाधकाः ॥

### तत्र रक्तमाद्र्या लक्षणं

व्यथा कट्यां तथा नाभेरधः पार्श्वे स्तनेऽपि च ।
रक्तमाद्रीप्रदोषेण जायते फलहीनता ।
मासमेकं द्वयं वापि ऋतुयोगो भवेद् यदि ।
रक्तमाद्रीप्रदोषेण फलहीना तदा भवेत् ॥

### षष्ठ्या लक्षणं

नेत्रे हस्ते भवेज्ज्वाला योनौ चैव विशेषतः ।
लालासंयुक्तरक्तं च षष्ठीबाधकयोगतः ॥
मासैकेन भवेद् यत्र ऋतुस्नानद्वयं तथा ।
मलिना रक्तयोनिः स्यात् षष्ठीबाधकयोगतः ॥

### अङ्कुरस्य लक्षणं

उद्वेगो गुरुता देहे रक्तस्रावो भवेद् बहुः ।
नाभेरधो भवेच्छूलं चाङ्कुरः स तु बाधकः ॥
ऋतुहीना चतुर्मासं त्रिमासं वा भवेद् यदि ।
कृशाङ्गी करपादे च ज्वाला चांकुरयोगतः ॥

### जलकुमारस्य लक्षणं

सशूला च सगर्भा च शुष्कदेहाल्परक्तिका ।

जलकुमारदोषेण जायते फलहीनता ।
या कृशांगी भवेत् स्थूला बहुकालमृतुस्तथा ।
गुरुस्तनी स्वल्परक्ता जलकुमार दूषणात् ॥
गर्भे जातेऽपि तस्य पतनं स्यात् ।

## योन्याक्षेपकः

### योन्याक्षेपस्य निदानं लक्षणंच

मारुते विगुणे योनो स्पर्शस्यातिप्रवृद्धता ।
विक्षेपणं मुखस्यास्यास्तत्स्पर्शे तीव्रवेदना ॥
योन्याक्षेपवती नारी न सहेत रतिक्रियाम् ।
यदि गच्छेद्बलाद्भर्त्ता तां सातिव्यथिता भवेत् ॥
नोपसर्पति भर्त्तारं सदा साध्वसविह्वला ।
पत्या तिरस्कृता दुःखान्मृत्युमात्मन इच्छति ॥
उद्वेगो बह्निहानिश्च निद्राल्पत्वं तथा क्रमात् ।
वस्तिदाहो व्यथा पृष्ठेऽशक्तिश्चंक्रमणेऽपि च ॥
दौर्बल्यं वर्णहानिश्च तथोत्साहस्य संक्षयः ।
योन्याक्षेपगदस्यैताः प्रोक्ता आकृतयो बुधैः ॥

## जरायुरोगः

### जरायुरोगस्य निदानम्

नैरन्तर्य्येण गर्भस्य सम्भवात् स्रावतोऽस्य च ।
शैत्यादार्द्राभिवासाच्च पापोपदंशतस्तथा ॥

---

१ फिरंगरोगतः ।

अतिव्यवायतः पापमेहिना सह सङ्गमात् ।
जरायुरोगो जायेत लिंगन्यस्य निशामय ॥

तस्य लक्षणम्

ज्वरोऽग्निमान्द्यमास्यस्य नीलत्वं त्रिकतोदनम्[१] ।
व्यथा निम्नोदरे वस्ताबुष्णत्वं गौरवं तथा ॥
मुहुर्मूत्रप्रवृत्तिश्च योनितः क्लेदसंस्रुतिः ।
मलस्यातिप्रवृत्तिश्च ततस्तद्रोध एव च ॥
दुर्नामानि च दौर्ब्बल्यं शिरोरुग् वमथुस्तथा ।
जरायुरोगे जायन्ते आकारा एवमादयः ॥

आकारा लक्षणानि ।

Indira Gandhi National
Centre for the Arts

## अण्डाधारगदस्य

अण्डाधारगदस्य निदानम्

रमणातिशयाच्छैत्यादभिघाताद्विषादपि ।
अण्डाधारगदः कृच्छ्रो जायते चाहिताशनात् ॥

अण्डाधारगदस्य निदानम्

उदरोरुव्यथा कृच्छ्रा मूत्रस्याल्पत्वरक्तते ।
ज्वरारोचकहृल्लासा अरतिर्बलसंक्षयः ॥
धमनी वेगिनी क्षुद्रा जिह्वा रक्तोज्ज्वला तथा ।
अण्डाधारगदस्यैताः प्रोक्ता आकृतयो बुधैः ॥

---

१ नितम्बयो रुपरिस्थित त्रिकपीड़ा ।

## खञ्जनिकः

खञ्जनिकाधान्यं निघण्टुषुनदृश्यते। खञ्जनिका खञ्जनी शब्दौ खञ्जन पक्षिणि, किन्तु धान्यस्य खिसारी संज्ञालोके तत्त्रिविधं महद् [ खिसारा ] मध्यमं खिसारी ह्रस्वखिसारी। अतोऽत्र खंजनिकाकथन मसंगतमिवप्रतिभाति।

### खञ्जनिकस्य निदानम्

खंजन्यदनसातत्यादनिलो विकृतं गतः।
सक्थ्नि संजनयेद्व्याधिं घोरं खंजनिकाभिधम्।
खंजनीति द्विदलभेदः। तस्या निरन्तरभक्षणात् खंजनीरोगः।
खंजनी यामुने देशे बाहुल्येन प्रजायते।
तस्याः समशनात्‌ तत्र पीड्यन्ते व्याधिना जनाः॥
वातामयाधिकारे या प्रोक्ता कलायखंजता।
सैवायमिति कैश्चिद्‌व कैश्चिद्धान्योऽभिमन्यते॥

### अस्यानुपशयः

शैत्येनार्द्रतया चापि व्याधिरेव विवर्द्धते॥
स्त्रीभ्यः पुंसामयं व्याधिर्बाहुल्येनाभिजायते॥

### अस्य लक्षणम्

सुप्तोत्थितस्योषसि जानुसन्धौ
रुजा च गुर्वी च दृढ़ा जङ्घा।
ककुद्मती क्षीणबला ततो ना
सोऽङ्गुष्ठमाकृष्य चलेत् सुकृच्छ्रम्।
वक्रत्वं जानुसन्धेश्च जङ्घायाश्चापि शीर्णता।
पादसंस्थानवैरूप्यमरतिश्चात्र संभत्॥

# चिकित्सा

## यकृद्रोग चिकित्सा

प्लीहोद्दीष्टा· क्रियाः सर्व्वा यकृद्रोगे समाचरेत् ।
प्रातर्मूत्रेण संस्वेद प्लीहवत् तत्र चेष्यते ॥
क्षारं विडङ्गकृष्णाभ्यां पूतीकस्याम्बु१ निःसृतम् ।
पिवेत् प्रातर्यथाबह्नि यकृत्प्लीहप्रशान्तये ॥
जलौकोभिर्हरेद्रक्तं क्षारं वा तत्र पातयेत् ।
शिग्रु त्वग्राजिकाचूर्णैर्लेपस्तत्र च युज्यते ॥
तोयेन प्रस्थमानेन महाद्रावक२कर्षकम् ।
मेलयित्वाथ तत्स्थानमूर्वंघ्रयाद्यश्च३ मर्दयेत् ॥
पीतमूल्यभया धात्री द्राक्षारग्वधसिन्धुजैः ।
रेचयेद्रसचूर्णेन तैलेनैरण्डजेन वा ॥

Indira Gandhi National Centre for the Arts

## अग्निप्रभा वटी

सैन्धवं नरसारञ्च यवक्षारं तथा विडम् ।
मर्द्दयेद्रससिन्दूरं पटोलमूलजै रसैः ॥
माषमानां वटीं कृत्वा छायाशुष्कां समाचरेत् ।
प्रातः प्रातः भक्षयेत्तां कोकिलाक्षाम्भसा समम् ॥
यकृद्रोगं महाघोरं प्लीहानमतिदारुणम् ।
वाताष्ठीलां बह्निमान्द्यं गुल्मंचैषा व्यपोहति ॥

---

१ चिरविल्वस्य २ स्वर्णमाक्षिक कांस्यमाक्षिक सैंधव रसांजनाब्धिफेन स्वर्जिका साल्मलि टंकण नरसार स्फटिकाका सीस यवक्षाराणांद्रावः ३ रेबनचीनी ।

### यकृच्छूलविमर्दिनी वटिका

नरसारं कर्षमानं सैन्धवञ्च द्विकर्षकम् ।
कोकिलाक्षोद्भवं१ वीजं त्वचं रोहितकस्य२ च ॥
यमानीं चित्रकंचापि दशकर्षप्रमाणकम्
संमर्द्य वदरास्थ्याभां वटिकां पूतिकाम्बुना ॥
कृत्वा तां योजयेद्धीमान् कारवेल्लाम्भसा समम् ।
हन्त्येषा यकृतो व्याधीन् गुल्मप्लीहोदराणि च ॥
वाताष्ठीलामामवातं बह्निमान्द्यं सुदारुणम् ।
शूलंच वटिका नाम यकृच्छूलविमर्दिनी ॥

### कालधौतादिरसः

रसगन्धकलौहाभ्रतारमाक्षिकसंयुतम् ।
सूतपादमितं हेम मर्दयेत् कन्यकाद्रवैः ॥
धन्यराशी निशास्तिस्रो वासयेद्रसकर्म्मवित् ।
रसोऽयं कलधौतादिर्वल्लमात्रः प्रयुज्यते ॥
वातव्याधीनपस्मारं यकृद्रोगं ज्वरं क्रिमीन् ॥
क्लैव्यमुन्मादमत्युग्रं कासांश्चायं व्यपोहति ॥

### यकृद्दारणसिंहो रसः

सिन्दूरमभ्रकं तालं लौहं कर्षप्रमाणतः ।
माक्षिकंचाभयाक्काथैर्मर्दयेदतियत्नतः ॥
बल्लमात्रां वटीं कृत्वा छायाशुष्कां समाचरेत् ।
यकृद्दारणसिंहोऽसौ रसो यकृन्निकृन्तनः ॥

---

१ क्षुरकः [ तालमखानेति ] २ रोहीडा मरुदेशे प्रसिद्धः ।

यकृद्दरिलौहरसराजविद्याधररसरोहीतकलौहादीनि भेषजानि यथा दोषानुपानानि तथा प्लीहाधिकारोक्तान्यपि प्रयोज्यानीति।

जीर्णज्वराधिकारकथितानि भेषजानि प्रायशो नैखिल्येन प्लीहामये यकृद्दरे च देयानि।

विद्रधिं यकृति ज्ञात्वा हिक्काश्वासव्यथादिभिः।
शस्त्रं त्रिकूर्च्चकं१ तत्र प्रयुञ्ज्याच्छस्त्रकोविदः॥
पाययित्वा सुरां पूर्व्वं बलसत्वोपयोगिनीम्।
अग्रोपहरणीयोक्तं समाहृत्य जलादिकम्॥
सत्येनाप्यनृतेनापि वचसाश्वास्य चातुरम्।
ईश्वरं मनसा ध्यात्वा सर्व्वापद्विनिवारणम्॥
क्षिप्रहस्तो बली धीरः स्थिरचित्तो विचक्षणः।
बहुशो दृष्टकर्म्मा च कृतकर्म्माभयो भिषक्॥
शस्त्रं शस्त्रगुणोपेतं परिगृह्य त्रिकूर्च्चकम्।
सवेदनं शोथयुतं भित्वा चर्म्म सुलोहितम्॥
अन्तः प्रवेशयेदाशु विद्रधिर्भिद्यते यथा।
वहिर्नयेत्ततः शस्त्रं तस्य नाड़िकया विना॥
अवधानेन तत्कार्य्यं नानिलोऽन्तर्यथा विशेत्।
ततो जलाभिषेकाद्यैः शस्त्रपातव्यथाकुलकुलम्।
समाश्वास्यापसव्येन पार्श्वेन शाययेत्त् तम्।

---

१ व्रणविस्रावणार्थे षड़ङ्गुल शस्त्रविशेषः अङ्गुलानि तथाष्टैव शस्त्राङ्गायं त्रिकूर्चकम् फलैरन्तरमुखाकारैरङ्गुलैरन्वितत्रिभिः। एकैकस्य फलस्यैषा मन्तरं व्रीहि सम्मितं। वृन्तं पंचमुखाया-मङ्गोर्य्यंरुचक भूषितम्। [सु॰ टी॰ उ॰]

सक्षीरमतसीकल्कं साज्यं तत्र च लेपयेत् ।
अहिफेनासवं सम्यंमात्रया परियोजयेत् ।
क्षीरं मांसरसंचैनं पाययेद्बलसाधनम् ॥
ततो मासद्वयं यावदातुरः प्राप्तजीवितः ।
सुखं तिष्ठेत् त्यजेच्छ्रान्तिं भुञ्जीत लघु पोषणम् ॥
विद्रधौ महति प्राज्ञः शस्त्रमुत्पलपात्रकम् ।
युञ्ज्यान्नोपक्रमेज्जन्तुं संजातानेकविद्रधिम् ॥
मद्यमग्न्यातपं श्रान्ति गुर्वन्नं विषमाशनम् ।
तीक्ष्णाशनं दिवास्वापं निशि चापि प्रजागरम् ॥
तीर्य्यंत्रिकमथास्थानं शोकचिन्ताभयानि च ।
क्रोधवेगं वेगरोधं यकृद्रोगी परित्यजेत् ॥
जीर्णज्वरे हितं यद्य त्तत्तदत्रहितं मतम् ।
यकृत्प्लीहामये चापि तथा ज्ञेयं हिताहितम् ॥

## हृद्रोगस्य चिकित्सा

घृतेन दुग्धेन गुड़ाम्भसा वा पिबन्ति चूर्ण ककुभत्वचो ये ।
हृद्रोगजीर्णज्वर रक्तपित्तं हत्वा भवेयुश्चिरजीविनस्ते ॥
हरीतकी वचा रास्ना पिप्पली नागरोद्भवम् ।
शटीपुष्करमूलोत्थं चूर्णं हृद्रोगनाशनम् ॥
पुटदग्धं हरिणश्टङ्गं पिष्टं गव्येन सर्पिषा पिवतः ।
हृत्पृष्ठशूल मचिरादुपैति शान्ति सुकष्टमपि ॥
तैलाज्य गुड़विपक्वं चूर्णं गोधूम पार्थोत्थम् ।
पिबति पयोभुक् स भवति जितसकलहृदामयः पुरुषः ।

## पिप्पल्यादि चूर्णम्

पिप्पल्येला वचा हिङ्गु यवक्षारोऽथ सैन्धवम् ।

सौवर्चलमथो शुण्ठी चाजमोदेति चूर्णितम् ॥
दध्ना मद्येनासवेन कांजिकेन घृतेन वा ।
पाययेच्छुद्धदेहं हि वातिके च हृदयामये ॥
शीताः प्रदेहाः परिषेचनानि तथा विरेको हृदि पित्तदुष्टे ।
द्राक्षासिताक्षौद्र परुषकैः१ स्याच्छुद्धे च पित्तापहमन्नपानम् ॥
पिष्ट्वा पिवेद्वापि सिताजलेन यष्ट्याह्वयं तिक्तकरोहिणीञ्च ।
वचानिम्ब कषायाभ्यां वान्तं हृदि कफोत्थिते ।
वातहृद्रोगहृच्चूर्णं पिप्पल्याद्यं प्रपाययेत ॥
त्रिदोषजे लङ्घनमादितः स्यदन्नञ्च सर्व्वेषु हितं विधेयम् ।
हीनातिमध्यत्वमवेक्ष्य चैव कार्य्यं त्रयाणामपि कर्म्म शस्तम् ।
हिंगूग्रगन्धा२ विड़विश्व३ कृष्णाकुष्ठाभयाचित्रक यावशूकम्४
पिवेत् ससौवर्च्चल पुष्कराढ्यं यवाम्भसा शूलहृदामयघ्नम् ।

Indira Gandhi National
Centre for the Arts

पाठां वचां यवक्षारमभयामम्लवेतसम् ।
दुरालभां चित्रकञ्च त्र्यूषणञ्च फलत्रयम् ॥
शटीं पुष्करमूलञ्च तिन्तिड़ीकं५ सदाड़िमम् ।
मातुलुङ्गस्य मूलानि श्लक्ष्ण चूर्णानि कारयेत् ॥
सुखोदकेन मद्यैर्वा प्लुतान्येतानि पाययेत् ।
अर्शः शूलञ्च हृद्रोगं गुल्मञ्चाशु नियच्छति ॥
क्रिमिजे च पिवेन्मूत्रं विडङ्गामय संयुतम् ।
हृदि स्थिताः पतन्त्येवमधस्तात् क्रिमयो नृणाम् ॥

---

१ फालसा २ बर्बरी—बबयी इति भाषा । मारवाड़ी भाषायां बाबचीति३ शुण्ठी ४ यवक्षारः ५ इमली ६ आमयं—कुष्टं ।

यवान्नं वितरेच्चास्मै सविडङ्गमतः परम् ॥

## कासीसादि वटी

कासीसं सैन्धवं व्योम१ समं खल्वे विमर्दयेत् ।
गोधूमाज्र्जुनतोयेन भावयित्वा पृथक् पृथक् ॥
माषमात्रा वटीः कृत्वा यवक्राथेन संयुताः ।
दद्याद्धृद्रोगिणे धीमान् स्नेहेनान्यतमेन वा ॥

## हृदयरत्नं चूर्णम्

कासीसस्य च भागैकं पार्थस्य पंचधा तथा ।
श्लक्ष्णं चूर्णीकृतं दद्याद्धृदामयनिवृत्तये ॥

## हृदयेश्वरो रसः

रसगन्धक लौहाभ्रं विद्रुमं मौक्तिकं तथा ।
कन्याद्रवेण संमर्द्य गुञ्जाद्वयमितां वटीम् ॥
कृत्वा संशोषयेद्रौद्रवह्नियोगं विना भिषक् ।
पार्थाम्भसा२ सर्पिषा च दद्याद्धृद्रोगशान्तये ॥

## हेमामृत रसः

भागमेकं पारदस्य बलेर्भागद्वयं तथा ।
हेम्नः पादांमतं भागमेकैकं तारवङ्गयोः ॥
अज्र्जुनस्य कषायेण संमर्द्य रक्तिकोन्मिताम् ।
वटीं कृत्वा दापयेच्च सिताज्य मधुसंयुताम् ॥
शाम्यन्त्यनेन हृद्रोगाः सर्व्वे एव न सशयः ।
श्रीमद् गहननाथेन निर्म्मितोऽयं रसोत्तमः ॥

---

१ अभ्रभस्म २ अज्र्जुनस्वरसेन ।

रत्नाकरो रसः

हेमहीरक वैक्रान्त वङ्गाभ्र रस नन्दकाः१ ।
समभागमिता योज्याः सर्व्वतुल्यमयो मतम् ॥
खल्ले निक्षिप्य सर्व्वाणि भावयेत् ककुभाम्भसा ।
गोधूमस्य यवस्यापि क्वाथेन सप्तधा पृथक् ।
ततः कन्याम्बुना प्राज्ञस्त्रीन् वारान् परिखेचयेत् ॥
रक्तशाल्यन्तरे पिण्डं निशाः सप्त च धापयेत् ॥
समुद्धृत्य वटीश्चाथ कुर्यात् स्विन्नकलायवत्२ ।
अर्ज्जुनस्य कषायेण कांजिकेनासवेन वा ॥
गोधूमस्य यवस्यापि क्वाथेन हविषापि वा ।
यथादोषानुपानैर्वा प्रदद्यात् परमौषधम् ॥
वातिकं पैत्तिकंचापि श्लैष्मिकं सान्निपातिकम् ।
क्रिमिजं हृद्गदंचापि कौष्ठिकं पृथुकं तथा ॥
तथावरणिकं घोरं गदं विक्षेपिकाभिधम् ।
मेदः सूत्राभिधं चापि परिक्षयगदं तथा ॥
आयामिकांच यक्ष्माणं वातपित्त कफामयान् ।
हन्त्ययं निखिलान् रोगान् वृक्षानिन्द्राशनिर्यथा ॥

हृद्रोगेषु पथ्यापथ्य निर्णयः

पुरातनो रक्तशालिर्जाङ्गला मृगपक्षिणः ।
कुलत्थमुद्गयूषश्च पटोलं कदलीफलम् ॥
रसालं वृद्धकूष्माण्डं दाड़िमंच हरीतकी ।

---

१ नन्दीवृक्षः कौस्तुभ मणयः २ स्विन्नः [उबाले हुवेमटर]

द्राक्षा तक्रं सैन्धवञ्च हितानि हृदयामये ॥
वेगरोधो व्यवायंच व्यायामो निशि जागरः ।
सह्यविन्ध्य समुद्भूत सरितां सलिलं तथा ॥
मेषीपयो जलं दुष्टं गुरुतिक्ताम्ल भोजनम् ।
पत्रशाकञ्चाध्यशनं न हितानि हृदयामये ॥

### उरस्तोयस्य चिकित्सा

भेषजं श्लेष्महरणं मूत्रस्यापि प्रवर्तनम् ।
उरस्तोये गदे योज्यं विवेच्य भिषजा सदा ॥
पिपासानिग्रहः कार्य्यः शीताम्भोऽनिलसेवनम् ।
यत्नतः परिहर्त्तव्यमभिष्यन्द्यखिलं तथा ॥
पादावशिष्टं यत्तोयं तत्तृषायां पिबेन्मनाक् ।
पयसा वा शृतोष्णेन शान्ति कुर्य्यात् सदा तृषः ॥
वर्षाभूस्वरसं वापि यवक्षारसमायुतम् ।
पिबेन्नित्यमुरस्तोयी सायंप्रातरतन्द्रितः ॥
श्वयथौ मूत्रकृच्छ्रे च कासे श्वासे हृदामये ।
भेषजं गदितं यद्यत् तत्तदत्र प्रयोजयेत् ॥
नैवं व्याधिः समं यायान्निखिलैर्यदि कर्म्मभिः ।
कुर्य्याच्छस्त्रक्रियां तर्हि लघुहस्तो भिषग्वरः ॥
समुद्रवस्त्योर्मध्ये वा महीध्रग्रहयोरथ ।
पर्शुकास्थ्नोर्ग्रहदिशोः शस्त्रं नाम त्रिकूर्च्चकम् ॥
प्रवेश्यावहितो रक्षन् यकृत्प्लीहानमेव च ।
निःशेषं निर्हरेदम्बु व्याधिरेवं प्रशाम्यति ॥

ततो व्यवायमध्वानं व्यायामं शिशिरं जलम् ।
अहःस्वापं शुचं क्रोधं त्यजेद्वर्षं गदोत्थितः ॥

औपसर्गिकोपदंशस्य चिकित्सा

पिड़कामुपदंशस्य दहेत् क्षारनिपाततः ।
व्याधिस्तेन शमं याति न काश्चिद्‌ व्यापदोऽपराः ॥
कर्षं शोधितसूत्रस्य कठिन्यास्तद्वयं तथा ।
यत्नतो मर्द्दयेत् तावद् यावत् सूतो न दृश्यते ॥
अस्य गुञ्जाद्वयं खादेत् प्रत्यहं त्रिः पुटस्थितम् ।
दन्तवेष्टव्यथायाञ्च लालास्रावे च तत् त्यजेत् ॥
रसचूर्णस्य कर्पूररसस्यापि निषेवणात् ।
अनेन विधिनैवासौ गदो घोरः प्रशाम्यति ॥
पलार्द्धप्रमितं चूर्णं तोये पञ्चशरावके ।
क्षिप्त्वा विलोड्य सम्यक् च चतुर्यामास्ततः परम् ॥
स्वच्छांशमूर्द्ध्वगञ्चास्य गृह्णीयादतियत्नतः ।
इदं चूर्णोदकञ्चाम्लनाशनं व्रणमेहनुत ॥
द्विपले चूर्णतोयेऽस्मिन् रसचूर्णस्य२ माषकम् ।
क्षिप्त्वा सम्मिश्रयेत् तावत् यावत कृष्णप्रभं जलम् ॥
कृष्णद्रवेन चानेन क्षालनं व्रणहृत् परम् ।
उपदंशे विशेषेण शस्तमेतन्महौषधम् ॥

---

१ खड़िकायाः [ खड़ियानाममिट्टीति प्रसिद्धा ] यथा बाला-अक्षराङ्कनङ्कुर्वन्ति २ पारदचूर्णं [ केलोमिल ] रसकर्पूर मापणे लब्धश्यम् । वा मूलोक्त रसचूर्णम् ।

सार्द्ध द्विपलमानेऽस्मिन् निक्षिपेन्नवरक्तिकम् ।
कर्पूररसमेतेन कृत्वा पीतद्रवौषधम् ॥
व्रणं पापोपदंशस्य क्षालयेत् तेन वारिणा ।
एतच्च परमं प्रोक्तमौषधं विबुधैरिह ॥
विद्रधौ या क्रिया प्रोक्ता व्रध्नरोगे१ऽपि सा हिता ॥
गौणोपदंशो विषमे पित्तघ्नश्चास्रशोधनम् ।
सरं भेषजमन्नञ्च पानञ्चापि विनिर्द्दिशेत ॥

अनन्ताद्यं घृतम्

अनन्तामलकोद्राक्षाः काकोलीयुगलं वरीम्२ ।
एलाद्वयं विदारीञ्च मधूकं३ मधुकं४ मुराम् ॥
त्रिफलां स्वर्णपर्णाञ्च५ वीजं गोक्षुरसम्भवम् ।
दशमूलं तालमूलीं त्रिवृतामिन्द्रवारुणीम् ॥
नीलिनीं६ शूकशिम्ब्याश्च वीजं कर्षप्रमाणतः ।
कल्कीकृत्य पचेत् प्रस्थे सर्पिषः शारिवाम्भसा ॥
घृतमेतदनन्ताद्यमुपदंशविनाशनम् ।
रसायनं परं वृष्यमस्रदोषनिषूदनम् ॥
भेषजं कुष्ठशमनं वातरक्तहरं तथा ।
गौणे मुख्ये च संयोज्यमुपदंशे यथायथम् ॥

---

१ वङ्क्षण सन्धिभवोग्रन्थिव्रणाः [ वाघी ] बुध नाम्ना प्रसिद्ध· २ शतावरी ३ गुड़पुष्पः [ महुवा ] ४ मधुयष्टिका [ मुरहटी ] ५ स्वर्णपत्री [ सनाय ] ६ नीलवीजानि वा [ कालादाना ] ७ बानरीवीजानि [ कौंचके वीज

पापप्रमेही वातास्री कुष्ठी पापोपदंशवान् ।
न भजेदङ्गनां नापि तथा नारीस्वस्वामिनम् ॥
रक्तशालिं यवं मुद्गं घृतं शिग्रुफलं तथा ।
पटोलं तिक्तवर्गञ्च निषेवेतोपदंशवान् ॥
दिवानिद्राञ्च गुर्व्वन्नं वेगसन्धारणं गुड़म् ।
मद्यमायासमम्लञ्च वर्ज्जयेदुपदंशवान् ॥

### आगन्तुज पक्षाघातस्य चिकित्सा

मुख्यं चिकित्सितञ्चास्य निदानपरिवर्ज्जनम् ।
निदानसेविनो व्याधिर्नौषधाद् विनिवर्त्तते ॥
स्वेद सञ्जननं सर्व्वं मूत्रकृच्च विरेचनम् ।
रक्तदोषहरं चात्र शर्म्मदं भेषजं मतम् ॥
गन्धकं परमं प्राहुर्भेषजं पारदामये ।
नेपालनिम्बतोयेन सेव्यो लौहोऽस्य शान्तये ॥

### नागज पक्षाघातस्य चिकित्सा

स्वेदनं भेदनं चापि कुष्टघ्नं यच्च भेषजम् ।
तत्सर्व्वमिह संसेव्यं कृत्वा हेतुविवर्ज्जनम् ॥

### गदोद्वेगस्य चिकित्सा

सान्त्वनाश्वासनस्नेहहर्षणैः परिचर्य्यया ॥
अपदार्थगदाक्रान्तं चिकित्सेत् तर्पणेन च ॥
पाचनं वह्निकृद् यच्च तद् वातस्यानुलोमनम् ।
पित्तहृन्नातिकफकृत् तद् युञ्ज्यादत्र भेषजम् ॥
वातव्याध्युदितान्यत्र तैलानि च घृतानि च ।

युक्त्या युञ्ज्याद्भिषक्प्राज्ञो भेषजञ्च रसायनम् ॥
गदो मिथ्येति न वदेद्भिषगस्य कदाचन ।
स यद्ब्रवीति वृत्तान्तं शृणुयादवधानवान् ॥

अत्र पथ्यापथ्य व्यवस्था

हृद्यं स्निग्धञ्च पानान्नं सुपाच्यं देहपोषणम् ।
अपदार्थगदे प्रोक्तं शुभायान्यन्न शर्म्मणे ॥

योषापस्मारस्य चिकित्सा

यद् धातुपोषकं पानमन्नमौषधमेव च ।
कोष्ठशुद्धिकरञ्चापि तत्तदत्र प्रयोजयेत् ॥
मूर्च्छायां शीततोयेन सेकः शिरसि चक्षुषोः ।
शिरोविरेचनं वापि प्रयोज्यं तन्निवृत्तये ॥
अत्र प्रयोजयेत् सर्व्वं मूर्च्छापस्मारभेजम् ।
जरायुदोषं निखिलं प्रतिकुर्य्याद् यथाविधि ॥
योषापस्मारणं सान्त्वैः प्रियदानाञ्च शाम्यति ।

बृहत् भूतभैरवरसः

द्विगुणं स्वर्णसिन्दूरं तत्समं हेमभस्मकं१ ।
मुक्ता प्रबाल कान्तायो राजपट्टं समं मतम् ॥
कन्यानीरेण२ संमर्द्य भेकपर्ण्या३ रसेन च ।
पत्रैरेरण्डजै र्बद्ध्वा धान्यराशी निधापयेत् ॥
त्रिदिनान्ते समुद्धृत्य बल्लमात्रां वटीं रचेत् ।

---

१ सुवर्ण भस्म    २ कुमारी [ गुवारपाठा ]    ३ मंडूक-पर्ण्याः [ ब्राह्मी ]

एकैकां वटिकां खादेत त्रिफला-शर्करा-युताम् ॥
अथवा पयसा सर्द्धं भूतोन्माद-विनाशिनीम् ।
अपस्मारं महाघोरं योषापस्मारमेव च ॥
हन्त्यवश्यं मदं मूर्च्छां विविधा वातवेदनाः ॥

### सन्न्यासस्य चिकित्सा

प्रभूतदोषस्तमसोऽतिरेकात् सम्मुर्च्छितो नैवं विबुध्यते यः ।
सन्न्यस्तसंज्ञः स हि दुश्चिकित्स्यो नरो भिषग्भिः परि-कीर्त्तितोऽसौ ।

अञ्जनान्यवपीड़ाश्च धूमाः प्रधमनानि च ।
सूचिभिस्तोदनं शस्तं दाहः पीड़ा नखान्तरे ॥
लुञ्चनं केशलोम्नाञ्च दन्तैर्दंशनमेव च ।
आत्मगुप्तावघर्षश्च हितस्तस्यावबोधने ॥

अवपीड़ः कल्कीकृतौषधस्य नासापुटे दानम् । प्रधमनं औषधचूर्णस्य द्विमुख्या नाड़िकया मुखवातेन दानम् । तस्य सन्न्यस्तस्य ।

मूर्च्छास्वपि च सर्व्वासु सन्न्यासाख्ये तथा गदे ।
अपस्मारोन्मादहरान् योगान् युक्त्या प्रयोजयेत् ॥

### शैशवसन्न्यासस्य चिकित्सा

व्याधो शैशवसन्न्यासे निदानानां निराकृती ।
विदध्यात् सर्व्वथा यत्नं कर्म्मदोषहरं तथा ॥
कुर्य्याच्च रुबुतैलेन रसचूर्णेन वा पुनः ।
रेचनं शिशुसन्न्यासे स्वेदस्तत्रोदरे हितः ॥

Indira Gandhi National Centre for the Arts

अरोगिण्याः शिशुं धात्र्या स्तन्यं शुद्धं प्रपाययेत् ।
स्तन्यस्य शोधनं वापि कुर्य्याद् यस्याः पिबेत्सततं ॥

स शिशुः । तत् स्तन्यम् ।

क्रिमिजे शिशुसन्न्यासे क्रिमीणां हरणं हितम् ।
कणामधुयुतं सूतं मूर्च्छायां प्राशयेद्भिषक् ॥

सूतं मारितम्

ताम्रचूर्णं समोशीरं केशरं शीतवारिणा ।
पीतं मूर्च्छां द्रुतं हन्याद् वृक्षमिन्द्राशनिर्यथा ॥
शुण्ठीकृष्णाशताह्वाश्च साभयागुड़संयुता ।
प्राशिता नाशयत्याशु भ्रमरोगं सुदारुणम् ॥
ताम्रं दुरालभाक्वाथैः पीतन्तु घृतसंयुतम् ।
निवारयेद् भ्रमं शीघ्रं संशयोऽत्र न विद्यते ॥
सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च ।
वस्तमूत्रेण सम्पिष्टं नस्यं तन्द्रानिवारणम् ॥

वस्तमूत्रेण छागमूत्रेण ।

शिरीषवीजं लशुनं पिप्पिलीं लवणोत्तमम् ।
मनःशिलाञ्च मधुना श्लक्ष्णं यत्नेन मर्द्दयेत् ।
तस्याञ्जनेन तन्द्राशु सनिद्रा विनिवर्त्तते ॥
तन्द्रिणं सुखशय्यायां प्रकामं स्वापयेद्भिषक् ॥

निद्रानाशस्य चिकित्सा

पिप्पलीचूर्णयुक्तस्य गुड़स्य परिलेहनात् ।
चिरादपि च संनष्टां निद्रामाप्नोति मानवः ॥

इक्षुरः पोतकी माषाः सुरा मांसं घृतं पयः ।
गोधूमगुड़मत्स्याश्च निद्रां कुर्व्वन्ति देहिनाम् ॥
शक्राशनमजाक्षीरं पादलेपात् तदर्थकृत ॥

मूर्च्छान्तकरसः

सिन्दूरं माक्षिकं हेम शिलाजत्वयसी तथा ।
शतमूल्या विदार्य्याश्च स्वरसेन विभावयेत् ॥
श्लक्ष्णं पिष्ट्वा ततः कुर्य्याद् वटिका वल्लसम्मिताः ।
रसो मूर्च्छान्तको हन्यादसौ मूर्च्छाः शिवोदितः ॥
तैलं नारायणाद्यञ्च कल्याणाद्यं तथा घृतम् ।
मूर्च्छास्वपि च सर्व्वासु सन्न्यासे च प्रयोजयेत् ॥

अत्र पथ्यापथ्य व्यवस्था

यवो लोहितशालिश्च वार्त्ताकुश्च पटोलकम् ।
यूषा जाङ्गलमांसस्य रोहिताद्यास्तथा झषाः ॥
धारोष्णं गोपयस्तक्रं स्नानं नद्या जलेऽमले ।
हितान्येतानि मूर्च्छायां संन्यासाख्ये तथा गदे ॥
तीक्ष्णं द्रव्यं क्रियां तीक्ष्णां वेगानांच विधारणम् ।
क्रोधशोकाद्यभिभव इत्येतैर्वर्द्धते गदः ॥

तत्त्वोन्मादस्य चिकित्सा

स्नायुस्थैर्य्याकरं यद्वत् तथा वातानुलोमनम् ।
भेषजं पानमन्नंच तत्तदत्र प्रयोजयेत् ॥

श्रीखण्डादिचूर्णं

श्रीखण्डं शारिवां श्यामां मुशलीं मधुकं विडम ।

पालत्रयं निशाद्वन्द्वमुत्पलं नागकेशरम् ॥
मांसीमिक्षुरकं बालमुशीरं गिरिमृत्तिकाम् ।
वलां नागवलांचैव भिषगेकत्र चूर्णयेत् ॥
पयसा धारयोष्णेन शाणमस्य प्रपाययेत् ।
अनेन नाशमायान्ति तत्त्वोन्मादादयो गदाः ॥

चैतन्योदयरसः

हेमाभ्रं मौक्तिकं सूतं गन्धकं जतुकायसी ।
तुगाक्षीरं शशाङ्कं च भावयित्वा वराम्भसा ॥
रक्तिमाना वटीः कृत्वा च्छायायां परिशोषयेत् ।
शतावर्य्यम्भसा शान्त्यै तत्त्वोन्मादस्य पाययेत् ॥
शतधौतघृताभ्यङ्गोऽसमे च मधुसर्पिषी ।
आज्यं सलिलमिश्रंच ब्रह्ममोहे परौषधम् ॥
कदाचित् ताड़नाद्यैश्च ब्रह्ममोहः प्रशाम्यति ।
गदे त्वप्रकृते तस्मिन् प्रहार एव भेषजम् ॥
अप्रकृते कृत्रिमे ।
अपस्मारहरं यच्च वातव्याधिहरं तथा ।
घृततैलादिकं सर्व्वं ब्रह्ममोहे प्रशश्यते ॥

अत्र पथ्यापथ्य व्यवस्था

धारोष्णं गोपयः शस्तं शालयश्च पुरातनाः ।
यवमुद्गतिलाश्चापि निखिलं चानुलोमनम् ॥
परिहासः प्रियैः सार्द्धं प्रियामिश्च सहासनम् ।
इत्येतानि हितान्यत्र विपरीतान्यशर्म्मणे ॥

### स्नायुशूलस्य चिकित्सा

यदग्नेर्द्दीपनं किञ्चिद् यद् वा बलवर्द्धनम् ।
वातानुलोमनं यच्च स्नायुशूले तदौषधम् ॥

### स्नायुशूलहरं चूर्णम्

एलाद्वयमुशीरंच चन्दनं शारिवाद्वयम् ।
मेदाद्वन्द्वं निशाद्वन्द्वं गुडूचीं विश्वभेषजम् ॥
फलत्रयं यमनञ्च रौप्यं सर्व्वसमं तथा ।
एकीकृत्य वल्वमानं पोययेद् गव्यसर्पिषा ॥
स्नायुशूलहरं नाम चूर्णमेतद्धरेद्ध्रुवम् ।
निखिलं स्नायुशूलंच सर्वान् वातामयांस्तथा ।

### मिहिरोदयो रसः

Centre for the Arts

माक्षिकं रजतं लौहं सिन्दूरं वह्निवारिणा ।
भावयित्वा विमर्द्दयाथ कृत्वा रक्तिमिता वटीः ॥
एकैकां खादयेदासां त्रिफलाद्भिरहन्मुखे ।
मिहिरोदयनामायं स्नायुशूलं रसो हरेत् ॥

---

प्रयोज्यं दारु गरल मर्द्द भेद प्रशान्तये ।
विरती तत् प्रयोक्तव्यं न प्रकोपे कदाचन ॥
मदिरामृतसाराख्यं हौहं क्षोदः कुपीलुजः ।
सेव्यान्येतानि विधिना स्नायुशूलस्य शान्तये ॥
स्वेदसेक प्रलेपांश्च स्नायुशूलेषु योजयेत् ।
तीव्रं विरेचनंचात्र विदध्यान्मलसंचये ॥

घृततैलादिकं योज्यमनिलामय नाशनम् ।
स्नायुशूलेषु सर्व्वेषु भेषजंच रसायनम् ॥

अत्र पथ्यापथ्य

यत् पथ्यं यदपथ्यंच वातव्याधौ प्रकीर्त्तितम् ।
तथैव स्नायुशूलेषु नीर्णितं विबुधैरिति ।

ताण्डवरोगस्य चिकित्सा

बृंहणं रेचनंचैव वन्हेर्बलविवर्द्धनम् ।
औषधं पानमन्नंच प्रयोज्यं ताण्डवे गदे ॥
क्रमिसंचयसम्भूते कार्य्यं क्रमिविनाशनम् ।
रजोरोधभवे व्याधौ रजसस्तु प्रवर्त्तनम् ॥
श्यामामनन्तां मधुकं त्रिवृत्तां चन्दनद्वयम् ।
एलाद्वयं तथा धात्री क्वाथयित्वा जलं पिवेत्
अनेन प्रशमं याति ताण्डवाख्यो गदो ध्रुवम् ॥

ताण्डवारि लोहम्

दारु रामठ कर्पूर यशदायो१ यथोत्तरम् ।
प्रगृह्य चतुरावृत्त्या विभाव्य विजयाम्बुना ॥
कुपीलुजकषायेण पार्थस्य स्वरसेन च ।
षड्रक्तिकां वटीं कृत्वा युञ्ज्यात् ताण्डवशान्तये ॥

अत्र पथ्यादि

बृंहणं पानमन्नंव स्नानं स्रोतस्वतीरजले ।
शयनं क्लेशशून्यं यत् कर्म्म तच्चेह शर्म्मणे ॥
कर्षणाद्यखिलं प्रोक्तमशुभाय पुरातनैः ॥

---

१ यशद्भस्म लौहजंभस्म २ प्रवाहयुक्ताया नद्याजले ।

### क्लोमरोगस्य चिकित्सा

यद्वन्हेर्दीपनं यच्च मारुतस्यानुलोमनम् ।
अन्नपानौषधं सर्व्वं तत्तत् क्लोम्न्यातुरे हितम् ॥

### अभयादिक्काथः

अभयामलकं दारु धान्यकं विश्वभेषजं ।
द्राक्षा च शारिवेत्येषां१ क्काथः क्लोमगदापहः ॥

———

यो यः समाश्रयेद्व्याधिः क्लोम्नितं तमवेक्ष्य च ।
क्रियां संसाधयेद् वैद्यो यथादोषं यथाबलम् ॥
सुरेन्द्रमोदकश्चैव रसश्च शशिशेखरः ।
क्लोमरोगे प्रयोक्तव्यं विविच्य भिषजा सदा ॥
सुरेन्द्राभ्रवटी चैव वातपित्तहरं च यत् ॥

### तत्र पथ्यापथ्यानि

अनुग्राण्यन्नपानानि क्लोमामयनिपीड़ितः ।
सेवेतोऽग्राणि सर्व्वाणि यत्नतः परिवर्ज्जयेत् ॥

### वृक्कामयस्य चिकित्सा

यन्मूत्रलं शोणित शोधनञ्च यत्पोषणं वह्निविवर्द्धनञ्च ।
वृक्कस्य रोगे परियोजयेत् तद् व्याधेर्बलं वीक्ष्य भिषग् विधिज्ञः ।
रसो विवर्द्धयेद्व्याधिमतस्तं नेह योजयेत् ।

### सर्व्वतोभद्रा वटी

हेमरौप्याभ्रलौहानि जतु गन्धक माक्षिकम् ।

---

१ अनन्तमूलम् ।

वटीं रक्तिमितां कुर्य्याद्विमर्द्य वरुणाम्भसा ॥
वटीयं सर्व्वतोभद्रा निखिलान् वृक्कजान् गदान्।
हरेद्बस्तिभवांश्चापि शूलं वीर्य्यञ्च वर्द्धयेत् ॥
रसायनाधिकारोक्तान्यौषधान्यत्र योजयेत् ।
न चास्ति शमने किञ्चिन्निर्द्दिष्टमस्य भेषजम् ॥
पथ्यैर्बल्यैः सुपाच्यैश्च भिषगेनं प्रयापयेत् ॥

## ओजोमेहस्य चिकित्सा

विचार्य्य दोषदूष्यादीन् निदानं परिवर्ज्जयेत् ।
चिकित्सेन गदाक्रान्तं दोषदूष्यानुसारतः ॥
अयः प्रधानमगदं हितमत्र विशेषतः ।
वर्ज्जनीयं रसोद्भूतमौषधं शिवमिच्छता ॥
ओजोह्रासजदौर्ब्बल्यं दूरीकुर्य्यात् प्रयत्नतः ॥

## चन्दनादिः

चन्दनं नलदं द्राक्षा गुडूची मधुकं स्फटी ।
धात्री च क्काथ एतेषां ओजोमेहोपशान्तिकृत् ॥
तथा हारिद्र माञ्जिष्ठ मेहादीनां परौषधम् ।
सोपद्रवाणां कथितः कृपार्द्रेणै । शम्भुना ॥

## अजमोदादि चूर्णम्

अजमोदामृता शुण्ठी गुडूची त्रिफला त्रिवृत् ।
वीजं गोक्षुरजं दारुनिशा श्यामा नृसारकम् ॥
चूर्णमेषां माषमितं सेवितं यत्नतो हरेत् ।
ओजपिष्टादिजान् मेहान् द्रुतं भास्वान् यथा तमः ॥

द्राड़िमाद्यं घृतं चन्द्रप्रभा नाम वटी तथा ।
मुक्तावंगेश्वरश्चैव वसन्तकुसुमाकरः ॥
चन्दनाद्यासवोऽरिष्टो देवदारुसमुद्भवः ।
प्रमेहमिहिरं तैलं तथा मेहाधकारिकम् ॥
अगदं चात्र युञ्जीत नित्यं कुशलमिच्छता ॥

चन्दनासवः

चन्दने सरलं देवदारु दारुनिशा निशा ।
त्रिबृत् चित्रकमूलंचागुरु धात्री सुरप्रियम् ॥
शतमूल्याश्मभिद् वासात्वचश्च सारिवाद्वयम् ।
लक्ष्मणायास्तथा मूलं वावरीवरुणत्वचौ ॥
प्रत्येकं पलिकं ज्ञेयं द्रांक्षायाः पलविंशकम् ।
धातकी षोड़शपलां तुलामानां सितां तथा ॥
माक्षिकार्द्धपलं सर्व्वं जलद्रोणद्वये क्षिपेत् ।
मासमेकं भाण्डमध्ये सपिधाने निधापयेत् ॥
चन्दनासव इत्येष रोगानोकनिकृन्तनः ।
शुक्रदोषं रजोदोषं मूत्रदोषं सुदारुणम् ।
निहन्ति विविधान् मेहान् कृच्छ्रमष्टविधं तथा ।
चतस्रश्चाश्मरीस्तद्वन्मूत्राघातांस्त्रयोदशः ॥
अन्त्रवृद्धि पाण्डुरोगं कामलांच हलीमकम् ।
कासं श्वासं तथा कुष्ठमग्निमांन्द्यमरोचकम् ॥
औपसर्गिकमेहांश्च नाशयेदविकल्पतः ।
भाषितः श्रीमहेशेन लोकानां हितकारिणा ॥

### पथ्यापथ्यव्यवस्था

लघु बल्यं पुराणंच धान्यमुद्गयवादिथम् ।
वार्त्ताकुञ्च[१] पटोलंच काकोदुम्बरकं[२] तथा ॥
कारबेल्लादिकं शस्तं वर्ज्जयेन्मधुरं गुरु ।
मांसं मत्स्यान् तथाध्वानमातपाग्निनिषेषणम् ।
दूषितातिशीततोये स्नानपानावगाहनम् ॥

### औपसर्गिकमेहस्य चिकित्सा

व्रणमेही त्यजेद् यत्नाद्व्यवायं सोऽहितो यतः ।
स्त्रियाश्च परिभुक्ताया आमयं जनयेच्च तम् ॥
भेषजं पानमन्नंच निषेवेतानुलोमनम् ।
व्रणघ्नं मूत्रजननं क्रियामुग्रां विसर्जयेत् ॥
कोष्णे जात्या वराया वा क्वाथे शिश्नं निमज्जयेत् ।
वेदनोपशमस्तेन व्याधेश्च बलसंक्षयः ॥
आभा[३]निर्य्यासतोयंच यवक्षारयुतं पिवेत् ।
सजलं क्षीरमोमं वा व्रणमेह निवृत्तये ॥
पिवेद्वा शारिवाक्वाथं सक्षार नरसारकम् ।
श्यामामनन्तां कट्वीञ्च वीजं गोक्षुर सम्भवम् ॥
गन्धाश्मनरसाराभ्यां क्वाथयित्वा जलं पिवेत् ।
एकं सुरप्रियफलं मेहमागन्तुकं हरेत् ॥
वराभापिप्पलीनांञ्च व्रणमेहनिवृत्तये ।
कुर्य्यादुत्तरवस्तिञ्च कषायेण प्रयत्नतः ।

---

१ वृन्ताकं बैंगनशाकः २ मलपूफलम् प्रसिद्धम् ३ वब्बूलसार जलम् । बबूलगोंद जलयुक्तम ।

महाभ्रवटिका

त्रिः सप्तकृत्वा सम्भाव्य भृङ्गराजाम्भसाभ्रकम ।
तेन गन्धं रसं लौहं हेम चाभ्राद्ध सम्मितम् ॥
वराक्काथेन संमर्द्य वटिकां रक्तिकोन्मिताम् ।
औपसर्गिक मेहस्य नाशाय दापयेद्भिषक् ॥

कन्दर्परसः

रसो गन्धः प्रबालंच कांचनं गिरिमृत्तिका ।
वैक्रान्तं रजतं शंखं मौक्तिकञ्च समं समम् ॥
न्यग्रोधस्य कषायेण भावयित्वा च सप्तधा ।
वल्वोन्मानां वटीं कृत्वा त्रिफलाक्काथवारिणा ॥
सुरप्रियस्याज्र्जुनस्य काथेनाभाम्भसापि वा ।
औपसर्गिक मेहस्य शान्त्यर्थं विनियोजयेत् ॥

Indira Gandhi National
Centre for the Arts

शीर्षाम्बुरोगस्य चिकित्सा

भेषजं नेत्रजं यच्च यन्मूत्रस्य प्रवर्त्तनम् ।
रक्तदोषहरं यच्च तच्छीर्षाम्बुगदे शुभम् ॥
मुण्डयित्वा शिरस्तच्च च्छादयेदुष्णवाससा ।
पाययेन्नारिकेलस्य स्नेहंचापि निरन्तरम् ॥
सेवयेद्रसचूर्णंच१ स्तोकमात्रं२ निरन्तरम् ।
पीतमूलीं३ त्रिवृच्छ्यामे पथ्यामामलकीं शटीम् ॥
अनन्तां मधुकं मुस्तां धन्याकं कटुरोहिणीम् ।

---

१ पारदकज्ज्लीम्   २ अल्पमात्रायुक्त   ३ रेवडचीनी
४ हरीतकीम ।

हरिद्रे द्वे त्रिजातंच क्राथयित्वा यथाविधि ॥
यवक्षारेण सहितं पाययेदस्य शान्तया ।

सलिलशोषणं चूर्णं

रसचूर्णं यवक्षारं पीतमूलीं१ त्रिजातकम् ।
भार्गीमेलां तथा लङ्गीमभयामिन्द्रवारुणीम् ॥
समांसेन प्रगृह्याथ प्रयुञ्ज्यात्पयसा सह ।
शीर्षाम्बवेतन्निराकुर्य्याच्चूर्णं सलिलशोषणम् ॥

कुङ्कुमाद्यं घृतम्

कुङ्कुमं२ शारिवां द्राक्षां जीवन्तीमभयां विड़म् ।
पत्रं पटोलमूलञ्च सर्पिषा पाययेद्भिषक् ॥
अस्य मात्रां प्रयुञ्जीत वीक्ष्य व्याधेर्बलाबलम् ।
सर्व्वान् शीर्षगदान् हन्यात्कुङ्कुमाद्याभिधं घृतम् ॥

रसतैलं

धुस्तूरं धातकीं मूर्व्वां मधूकं मधुकं विड़म् ।
नागरं नीलिनीं कृष्णां कट्फलं कटुकं जलम् ॥
शाणमानेन निःक्षिप्य कटुतैलशरावके ।
संवृते मृण्मये भाण्डे निशाः सप्त च पाययेत् ॥
ततः कल्कान् विनिर्हृत्य कज्जलीमर्द्धकार्षिकीम् ।
तत्र सम्मिश्र्य शिरसि मुण्डिते तत् प्रयोजयेत् ॥

---

१ रेवडचीनी मूलम् उसारेरेवनमपीच्छन्ति सा न पीतमूली प्रत्यक्ष प्रमाणात् २ केसरं ।

रसतैलमिदं हन्यात् शीर्षाम्ब्वाशु न संशयः ।
व्याधितानां हितार्थाय हरेणैतत् समीरितम् ॥

### वह्निभास्करो रसः

सुवर्णमभ्रं वैक्रान्तं रजतं शाणमाणकम् ।
लौहं रसं गन्धकञ्च माक्षिकं कर्षसम्मितम् ॥
रक्तचित्रकतोयेन तथा ब्राह्मया रसेन च ।
त्रिः सप्तकृत्वः सम्भाव्य कुर्य्याद्वल्वमिता वटीः ॥
रसोऽयं सर्व्वथा हन्ति मस्तिष्कोदकमाशु च ।
अन्यांश्च शिरसो रोगान् वह्निस्तृणगणानिव ॥
वह्निवद्भासते यस्माद्वीर्य्येणैव रसोत्तमः ।
ख्यातः पृथ्वीतले तस्मादाख्यया वह्निभास्करः ॥

### मस्तिष्कोदकं [ शीर्षाम्बु ]

Indira ... Centre for the Arts

नैवं शान्तिं गते व्याधौ मस्तिष्कात् सलिलं हरेत ॥
त्रिकूर्च्चकेन लघुना यत्नतः कुशलो भिषक् ॥
लघु पुष्टिकरं सर्व्वं पानमन्नं रसंच यत ।
मस्तिकाम्बुनि तत्पथ्यं विपरीतं हिताय न ॥

### मस्तिष्कवेपनस्य चिकित्सा

मनःस्थैर्य्यकरं कर्म्म कार्य्यं मस्तिष्कवेपने ।
शिरस्युष्णेऽतिशीतेन तोयेन सेचनं हितम् ॥
मस्तिष्कवेपनध्वंसि दन्तीस्नेहेन रेचनम् ।
सजला बललाभाय मृतसञ्जीवनी सुधा ॥
प्रयोक्तव्या यथामात्रं बल्यमन्यच्च भेषजम् ।

वह्न्युष्मणा हरेच्छैत्यमङ्गानां कुशलो भिषक ॥
त्रिवृतां स्वर्णपत्रींच१ मुस्तकं मधुकं बलाम् ।
हरिद्रे द्वे नागरंच२ त्रिफलां कटुरोहिणीम्३ ॥
क्वाथयित्वा प्रयोक्तव्यं शीर्षवेपनशान्तये ।
वलाक्वाथेन सिन्दूरं शीर्षवेपथुनाशनम् ॥
वातव्याधिहरं सर्व्वं भेषजं तस्य शान्तिकृत् ॥

अत्र पथ्यादिव्यवस्था

पयोमांसरसाद्यञ्च स्नायूनां बलवर्द्धनम् ।
अन्नपानादिकं यच्च सुजरं स्वादु सारकम् ॥
शीर्षवेपथुरोगिभ्यो हितं तान्नखिलं मतम् ।
विपरीतं विजानीयात् कदाचन न शर्म्मदम् ॥

मस्तिष्कवृद्धेश्चिकित्सा

मस्तुलुङ्गस्य संवृद्धिर्जायते मरणाय हि ।
नौषधं तत्र चेत्सेव्यं तथापि च रसायनम् ॥
पेयमत्र पंचगव्यं घृतं मधुयुतं तथा ।

मस्तिष्कह्रासस्य चिकित्सा

मस्तिष्कस्य यदि ह्रासो मरणायैव जायते ।
तथाप्यत्र सदा सेव्यं भेषजं परिबृंहणं ॥

चन्दनादिक्वाथः

चन्दनद्वितयं मूर्व्वा श्यामाद्वन्द्वं४ निशाद्वयं५ ।

---

१ सनाय २ शुण्ठी ३ कटुकी ४ श्वेतसारिवा कृष्ण सारिवाति सारिवाद्वयम् ५ हरिद्रा दारुहरिद्रा ।

लाक्षा वांसी१ गैरिकश्च जीवन्ती मधुकं वरीर२ ॥
वाजिगन्धा वचा कृष्णा काकोली जीवकर्षभौ ।
क्वाथ एषां पिवेत् प्रातर्मस्तिष्कह्रासशान्तये ॥
अत्र वातामयोक्तानि तैलानि च घृतानि च ।
अपस्मारगदोक्तानि तथा सेव्यानि सर्व्वदा ॥
मस्तिष्कस्य चये ह्रासे देहस्य पोषणं लघु।
पानमन्नं सुखाय स्याद्विपरीतं न शर्म्मणे ॥

## अंशुघातस्य चिकित्सा

अङ्गावरणवासांसि दूरे निःक्षिप्य यत्नतः ।
प्रच्छाये प्रवहद्वाते गन्धाढ्ये मनसः प्रिये ॥
विविक्ते व्यक्तनभसि विहङ्गगणनादिते ;
शाययेत् सुखशय्यायामंशुघातिनमञ्जसा ॥
शीताम्बुसेकं कुर्य्याच्च चन्दनाम्बु च पाययेत् ।
नाधिकं पाययेदम्बु सहसा कुशलो भिषक् ।
आच्छादयेत्सर्व्वमङ्गं शीततोयार्द्र वाससा ॥
सहस्रधारया स्नानमंशुघातगदापहम् ।
दन्त्युद्भवेन तैलेन रेचनं हितमुच्यते ॥
अत्युष्णेनाम्भसा सिक्तं वस्त्रमूर्णामयं पृथु ।
ततो निर्हृत्य तोयञ्च श्रीवासपृषतावृतम् ॥
उष्णमेव च घाटायां निधायान्येन वाससा ।
शुष्केण वापि कदलीदलैर्नातिदृढं ततः ॥

Indira Gandhi National Centre for the Arts

---

१ त्वक्षीरम् [ वंशलोचनम्   २ शतावरी ।

वद्धातिदाहं यावच्च संरक्षेदतियत्नतः ।
अनेन विधिना मूर्च्छा नश्यत्येव हि सत्वरम् ॥
अङ्गानामुष्मणो नाशे धमन्याश्च व्यतिक्रमे ।
स्वेदो विधेयो योज्या च मृतसञ्जीवनी सुधा ॥

रत्नेश्वरो रसः

वज्रं वैक्रान्तमभ्रञ्च सिन्दूरमपि माक्षिकम् ।
मौक्तिकं हेम रौप्यंच सममिक्षुजवारिणा ॥
शतावरीरसेनापि विदार्य्याः स्वरसेन च ।
विभाव्य वटिकाः कुर्य्याद्रक्तिकाप्रमिता भिषक् ॥
त्रिफलाजलयोगेन रसो रत्नेश्वरो हरेत् ।
मस्तिष्कस्नायुजान् व्याधीनंशुघातं विशेषतः ॥
अंशुघाते प्रकर्तव्यो विधिर्मूर्च्छानिसूदनः ॥

महाशिशिरपानकम्

शर्करा द्विपलोन्माना चन्दनञ्चार्द्धकार्षिकम् ।
जम्बीरजंच पलिको रसोवर्य्याश्च तत्समः ॥
शाणञ्च मधुरी तैलं प्रस्थार्द्धप्रमितेऽम्भसि ।
मिश्रयित्वा समालोड्य स्तोकं स्तोकं मुहुर्मुहुः ॥
अंशुघातगदाक्रान्तं पाययेत् सुखदं हितम् ।
महाशिशिरनामेदं पानकं हरिणोदिम् ॥
भाबुकस्यद्विकर्षस्य पत्रकल्कं विधाय च ।
जलेनसहपातव्यं घर्मदाहस्य शान्तये ॥
अथवा प्रशलाटूनां पुटपाकेन चोत्तमम् ।

पेयं रसं प्रकल्याथ पटुजीरक संयुतम् ।
पेयं तेनैव शान्तिस्स्यादय मनुभवः कृतः ॥

घर्मदाहः लू इति नाम हिन्दी भाषायाम् ।

अंशुघाते निबृत्ते ऽपि मिथ्याहारविहारिणः ।
अपस्मारादयः प्रायो जायन्ते बहवो गदा ॥
तन्मुक्तोऽतो हितं नित्यं सेवेतावललाभतः ।
मन प्रीतिप्रदं कर्म्म विदधीत्त निरन्तरम् ॥

### अत्र पथ्यापथ्यव्यवस्था

अन्नपानादिकं स्निग्धं बलपुष्टिप्रदं सरम् ।
हितं स्यादंशुघातिभ्यो विपरीतं न शर्म्मणे ॥

### वाधकस्य चिकित्सा

रसाञ्जनं विडं वह्निं शीतेन पयसा सह ।
पीत्वा वाधकरोगेन सद्यो नारी प्रमुच्यते ॥
मरिचेन प्रजावत्या मूलं पीताम्भसा सह ।
पीत्वा वाधक निर्म्मुक्ता नारी गर्भं दधाति हि ॥

प्रजावती ओलटकम्बल इति यस्या प्रसिद्धिः

अन्तर्भवन्ति व्यापत्सु योनेः सर्व्वेऽपि वाधकाः ।
अतस्तासां विधानेन भिषगेतानुपाचरेत् ॥

### समस्त योनिरोगाणां चिकित्सा

योनिरोगवती नारी कुर्य्यान्नातिरतौ मतिम् ।
भूयसीं विकृतिं योनेर्यतः सा जनयेद्ध्रुवम् ॥

सा अतिरतिः ।

जीरकद्वितयं कृष्णा श्यामानन्ता निशाद्वयम् ।
वासासैन्धवपथ्याश्च यवक्षारो यमानिका ॥
एषां चूर्णं घृते किञ्चिद् भृष्ट्वा खण्डन मोदकम् ।
कृत्वा खादेद् यथावह्नि योनिरोगाद्विमुच्यते ॥

त्रिफलाद्यं घृतम्

त्रिफलां त्रिवृतां शुण्ठीं गुडूचीं सपुनर्नवाम् ।
विदारिकां हरिद्रे द्वे रास्नां मेदां शतावरीम् ॥
कल्कीकृत्य घृतप्रस्थं पचेत्क्षीरे चतुर्गुणे ।
तत्सिद्धं पाययेन्नारीं योनिरोगप्रशान्तये ॥
कुमारकल्पद्रुमकं फलकल्याणकं घृतम् ।
तथा सोमघृतं शस्तं योनिरोग प्रशान्तये ॥

अत्र पथ्यापथ्य व्यवस्था

बृंहणं पोषणं बन्हेर्दीपनञ्चानुलोमनम् ।
अन्नं पानं योनिरोगे सेवेतान्यद्विवर्ज्जयेत् ॥

योनिकण्डू चिकित्सा

योनिकण्डूगदे देयमादौ स्निग्धविरेचनम् ।
भेषजं रक्तदोषघ्नं बलदायि रसायनम् ।
अनन्तां सरिवां लोध्रं त्रिवृतामिभपिप्पलीम् ॥
क्राथयित्वा पिबेत्तोयं योनिकण्डूप्रशान्तये ॥

शिवकरो वटी

लौहश्चामृतसाराख्यं फणिफेनं घनं विडम् ।
वह्नितोयेन संमर्द्द्य माषमात्रं वटीं चरेत् ॥
वटी शुभकरी ह्येषा योनिकण्डूप्रशान्तिकृत् ।

### टङ्कणादिचूर्णम्

टङ्कनं पञ्चलवणं तुगाक्षीरीं शिलाजतु ।
नागरं मुस्तकं वह्नि पद्मकं नीलमुत्पलम् ॥
जीवन्ती मधुकं द्राक्षां गुडूचीं चन्दनद्वयम् ।
चूर्णयित्वाम्भसा नारी पिवेत् कण्डूप्रशान्तये ॥
योनिकण्डूगदे योनौ शीततोयाभिषेचनम् ।
स्नेहस्वेदश्च कर्त्तव्यो वस्तिश्चोत्तरसंज्ञितः ॥
योनिव्यापद्भदोक्तानि भेषजानीह योजयेत् ॥

### अत्र पथ्यापथ्यानि

यद् यद् वह्निकरं पाच्यं तथा वातानुलोमनम् ।
अन्नं पानञ्चात्र योज्यं विपरीतं सुखाय न ॥

### योन्याक्षेपस्य चिकित्सा

नागदेन गदः साध्यश्शस्त्रेणायं प्रसाध्यते ।
शस्त्रं प्रयोजयेदत्र भिषक् शस्त्रविशारदः ॥
पाययित्वा सुरां तीव्रां गदिनीं सव्यशायिनीम् ।
उत्तानामथवा कृत्वा योनौ शस्त्रं प्रवेश्य च ॥
ह्रीमन्तं१ त्वरयाच्छिद्य मुखं योनेर्विदार्य्य च ।
तूलेनारुध्य२ वध्नीयाल्लघुहस्तश्चिकित्सकः ॥
ह्रीमन्तं योन्यङ्गभेदम् ।
अवरोधे तु मूत्रस्य वर्त्तयेत् तच्छलाकया ।
वेदनां वारयेदुवैद्यः फणिफेनप्रयोगतः ॥
पुनर्घस्रद्वयान्ते तां पाययित्वा सुरां भिषक् ।

---

१ लज्जापटलं   २ रुईतिनाम्ना ।

तूलं निःसार्य्य योनिस्थं मुखं योनेः प्रसार्य्य च ॥
तदधःकत्तर्नं कुर्य्यादङ्गुलार्द्ध प्रमाणतः ।
इत्येवं कर्म्मणा व्याधिर्योन्याक्षेपः प्रशाम्यति ॥

अत्र पथ्यापथ्यानि

अत्र पथ्यं घृतं दुग्धं गोधूम चणकादयः ।
यूषश्छागादिसम्भूत उग्रवीर्य्यं हितं न हि ॥

जरायुरोगस्य चिकित्सा

जरायुरोगे प्रथमं देयं स्निग्धविरेचनम् ।
हितोऽत्रोत्तरवस्तिश्च सुखोष्णेनाम्भसा तथा ॥
अधोदेहस्य सलिले चोष्णे संमज्जनं हितम् ॥
अतसीवीजकल्केनतत्तेन सह सर्पिषा ।
पुटलेपो हितः प्रोक्त उदराधो मनीषिभिः ॥
नारिकेलजतैलेन रससिन्दूरसेवनम् ।
जरायुरोगं शमयेत् तथा पथ्यानुवर्त्तनम् ॥

शारिवादि चूर्णम्

शारिवाद्वयमञ्जिष्ठात्रिवृद् द्राक्षा वरी बलाः ।
शतपुष्पा कणाद्वन्द्व१ दारु दारुनिशा निशाः ॥
क्षारत्रत्रं चतुर्ज्जातं तथा लवण पञ्चकम् ।
फलत्रयं मुस्तकञ्च मधुकं विश्वभेषजम् ॥
चूर्णयित्वा पिवेन्नारी प्रातः प्रातः प्रसन्नया ।
जरायुरोगः प्रशमं यात्यनेन न संशयः ॥

---

१ हस्तिपिप्पली च एतद्वयम् । एतदायुर्विज्ञानतस्संग्रहीतं छत्राणां हिताय ।

प्रमदानन्दो रसः

अयो रौप्यं तथा हेम रसं गन्धं शिलाजतु ।
वह्निद्रवेण सम्मर्द्य रक्तिमाना वटीश्चरेत् ॥
नाम्नासौ प्रमदानन्दो रसो ह्याशु विनाशयेत् ।
त्रिफलातोययोगेन सर्व्वाञ्जरायुजान् गदान् ॥
जरायुरोगिणी नारी न च सेवेत पूरुषम् ।
न खादेदुग्रवीर्य्याणि नापि कूर्य्यादतिश्रमम् ॥

अण्डाधारगदस्य चिकित्सा

बलप्रवर्द्धकं यद्यत् पवनस्यानुलोमनम् ।
अण्डाधारगदे तत्तत्प्रयोक्तव्यं भिषग्वरैः ॥

पटोलादिकाथः

पटोलं मधुकं द्राक्षां धन्याकं विश्वभेषजम् ।
पीतमूलीं वलां रास्नां मूर्व्वामिन्द्रयवं विडम् ॥
कणाद्वन्द्वं निशाद्वन्द्वमिन्द्रपुष्पं त्रिजातकम् ।
क्काथयित्वा पिवेत्तोयमण्डाधारगदे सदा ॥
विषञ्च मधुना ज्ञेयमण्डाधारगदे हितम् ॥

योषिद्वल्लभो रसः

सिन्दूरमभ्रं रौप्यञ्च वैक्रान्तं हेम टङ्कनम् ।
वराम्भसा[1] भावयित्वा वल्लमात्रा वटीश्चरेत ॥
योषिद्वल्लभनामायं रसोऽण्डाधारसम्भवान् ।
निहन्ति निखिलान् रोगान् हर्य्यक्षो हरिणानिव ॥

---

१ त्रिफलाक्काथजं जलेन ।

### चन्दनाद्यं चूर्णम्

चन्दनद्वितये मूर्व्वा नीलिन्येलाद्वयं मुरा ।
कणाद्वयं त्रिवृद्द्राक्षा मांसी मधुक मुस्तकम् ॥
एतत्सर्व्वं चूर्णयित्वा डिम्बाधार१गदापहम् ।
उष्णेन पयसा नारी पिबेन्नित्यं सुखार्थिनी ॥

### अत्र पथ्यापथ्यानि

पथ्यमत्र हविर्दुग्धं शालिः प्रत्नो यवस्तिलः ।
छागमांसरसश्चैव द्रव्यमुग्रं न शर्म्मणे ॥

### खञ्जनिकस्य चिकित्सा

आरोग्यमिच्छता त्याज्यं खञ्जनीद्विदलाशनम् ।
निदानसेविनो यस्मान्न व्याधिर्विनिवर्त्तते ॥
वातघ्नं पोषणं यच्च पानमन्नञ्च भेषजम् ।
प्रयोज्यमिह तत्सर्व्वं विविच्य भिषजा सदा ॥
वलां गन्धतृणं माषां त्रिबृतां कटुरोहिणीम् ।
क्राथयित्वा पिबेत्तोयं खञ्जन्यामयशान्तये ॥
वातामयहरं सर्पिस्तैलञ्चात्र प्रयोजयेत् ॥

### खञ्जनिकारि रसः

कुपीलुरजतायांसि सम्भाव्यार्ज्जुनवारिणा ।
मुद्गमात्रां वटीं कृत्वा शोषयेत् सूर्य्यरश्मिना ॥
पक्षपातं घोरतरं गदं खञ्जनिकं तथा ।
रसः खञ्जनिकार्य्याख्यो हरेदाशु न संशयः ॥

॥ इति ॥

१ स्त्रीणां डिम्बस्थान विशेषाधारजरोगनाशकरम् ।

IGNCA RAR
ACC. No R-308

हिन्दीमें नवीन पुस्तक

# सिद्धौषधमणिमाला

जिन पुस्तकोंको पढ़ने और उनके अनुभूत प्रयोग जाननेका आनन्द केवल गुरुमुखसे अध्ययन करनेवाले संस्कृतज्ञ विद्वानोंको ही प्राप्त होता था। जिनके प्रयोगोंके लिये प्रत्येक वैद्य लालायित रहता था। जिसकी कीमत भी विशेष थी। इत्यादि कारणोंसे वैद्योंके मनकी बात मनमें ही रह जाती थी। इसके एक एक प्रयोगके लिये महीनों तक विद्वान् वैद्योंकी खुसामद करनी पड़ती थी। आज उन्हीं पुस्तकोंका सारभूत सिद्धौषध मणिमाला नामक पुस्तक हिन्दीमें सचित्र छपकर तैयार है। मूल्य भी नाममात्र २।।) रु० डाकव्यय सहित।

इस पुस्तकको रखनेसे सिद्धभेषजमणिमाला आदि पुस्तकों की जरूरत नहीं पड़ती है। उनके समस्त प्रयोग प्रायः इसमें लिख दिये हैं।

---

Indira Gandhi National

# आत्म-सर्वस्व

## अपने अनुभूत प्रयोग

इस पुस्तकका प्रथम भाग पहले छप चुका है। इसके १००० अनुभूत प्रयोगोंकी प्रशंसा बड़े बड़े विद्वान् वैद्य कविराजोंने तथा हिन्दीके प्रतिष्ठित सभी पत्रोंने मुक्त कंठसे की है। इसके प्रथम भागमें अनेक वैद्यों कविराजों साधु-महात्मा फकीरोंके तत्काल फल देनेवाले अनेक रोगहर, एक हजार प्रयोग लिखे गये है। इसी प्रकार द्वितीय तृतीय भागमें एक एक रोगपर अनेक अनुभूत प्रयोग दिये गये हैं। प्रथम भागका मूल्य ३) द्वितीय तृतीय भागका मूल्य ३) डाकव्यय पृथक् देना होगा।

# सन्दिग्ध निर्णय वनौषध शास्त्र में क्या क्या है ?

( १ ) औषधिका नाम, जन्मस्थान, पहलेका और अबका, तथा बिकनेका स्थान।

( २ ) कहांके लोग किस रोगमें बरतते हैं।

( ३ ) उसके पत्र, पुष्प, फल, त्वचा, मूल और गोंदके रंग रूप और स्वाद।

( ४ ) उसके प्रधान और अप्रधान गुण।

( ५ ) रासायनिक परीक्षा द्वारा लोह, ताम्र, पारा, गन्धक, सुवर्ण, क्षार आदि क्या क्या धातु मिलती है।

( ६ ) शरीरके किस अंगपर उसका क्या प्रभाव पड़ता है।

( ७ ) गुण सूखीमें है या हरीमें।

( ८ ) प्राचीन ग्रन्थोंमें उसका कहां कहां प्रयोग मिलता है।

( ९ ) असली कौन और नकली कौन।

(१०) संस्कृत, हिन्दी, मराठी, गुजराती, बंगला, तामिल, तेलगू, कानड़ी, मलयाली, कच्छी, मारवाड़ी, पंजाबी और काश्मीर नाम तथा देहरादून, बद्रीनाथ, कुमायूं, खासिया पहाड़, शिलांग, नयपाल और भूटानमें प्रचलित नाम।

(११) प्रत्येक औषधके रंगीन चित्र।

इससे आप घर बैठे वैद्य हो सकते हैं।

यह पुस्तक खण्ड खण्ड प्रकाशित होगी, प्रत्येक खण्ड॰ मूल्य दो दो रुपया रक्खा गया है। डाकव्य पृथक। बि चित्र छै भाग और तैयार है।

IGNCA RAR
ACC. No. R-308

Indira Gandhi National
Centre for the Arts